34

द्वादशस्कंध.

बादशस्कंद. पत्रे ४८

श्री
भा॰ द्वा॰
१

ॐ श्रीगणेशाय नमः॥ ॐ जयति श्रीपरानंदकृपापांगलसद्गुणः॥ गुणः नित्यमनुवर्त्तंते सेवकादीविना
तादृशाः १ उक्तस्तृतीयो द्वयाध्यायैर्द्वादशोत्राश्रयः सतः अधिष्ठानावधित्वाभ्यामाश्रयश्चेश्वरः
सतः २ उक्तो लयावधित्वेन प्राकृतात्यंतिकेलये अधिष्ठानतयाचोक्तो महापुरुषवर्णने
३ तत्रोद्दाषड्भिरध्यायैः शुकश्राहपरीक्षितम् प्रोक्षेस्तत्राखिलात्माहमूतः एषो
यमितिभिः ४ स्वाश्रयश्रवणोकार्योन विलंबामनीषिणा इत्येषकालवेष
षमंचत्मभिलावङ्च्यते ५ तत्रनुप्रथमेभाविमागधान्वयभूमिपान् क
लिप्रभावतः प्राहसंकरादिमलीमसान् ६ एवंभूतेसोमवंशेमकंद
स्वाङ्कोशवर्णिताध्यासतश्च वंशोभावीवर्णितेकृष्णभक्तिम
कामृतेवत्सनात्वीतिवकम् ७ तदेववेचैवसूततमनुवंशे ८
सोमवंशप्रसङ्गावेनश्रीकृष्णावतारचरितानिप्रपंच
मनुवर्णितानि अधैतानीभाविसोमवंशाः कलौ
विज्ञानीयसंकरादिमलीमसीवैतापद्दाघश्री
श्रीकृष्णैकभक्तिनिरमतायाननुवर्ण्यते तत्रनसोमवंशशाखासचिरकालानुवर्त्तितयमापवंशोव
क्रमगते तत्रतत्पूरोर्वंशेऽध्यपरिचरोवसुस्तस्य बृहद्रथस्तस्य जरासंधस्तस्य सहदेवः पुत्रोमृद्धिस्तु तेन
वमस्कंधे तत्रैवसहदेवान्मार्जारिस्ततः श्रुतश्रवाः इत्यादयो रिपुंजयांता विंशतिर्भाविनोराजानो ९
निरूपिताः ॥ ॥

तदुपरितनंवंशंसंकरादिदोषैः प्रपंचयति योंत्यइतिरिपुंजयएवपुरंजयः स्वामिनंपुरंजयंहत्वास्वपुत्रंप्रद्योतंराजानंकरिष्यति १ यत्पालकोनामसुतोभविष्यति २ प्रद्योतनाः प्रद्योताः

श्रीराजोवाच॥ स्वधामानुगतेकृस्नेयद्वंशाविभूषणो कस्यवंशोभवत्पृथ्व्यामेतदाचक्ष्वमेमुने १ शुकः- योंत्यः पुरंजयोनामभविष्योवैवार्हद्रथः तस्यामात्यस्तुशुनकोहत्वास्वामिनमात्मजे २ प्रद्योतसंज्ञंराजानंकर्तायत्पालकःसुतः विशाखयूपस्तत्पुत्रोभविताराजकस्ततः नंदिवर्द्धनस्तत्पुत्रः पंचप्रद्योतनाइमे अष्टत्रिंशोत्तरशतंभोक्ष्यंतिपृथिवींनृप ३ शिशुनागस्ततोभाव्यःकाकवर्णस्तुतत्सुतः क्षेमधर्मातस्यसुतः क्षेत्रज्ञः क्षेमधर्मजः विधिसारःसुतस्तस्याःजातशत्रुर्भविष्यति दर्भकस्तत्सुतोभावीदर्भकस्याजयःस्मृतः ४ नंदिवर्द्धनआजेयोमहानंदिसुतस्ततः शिशुनागादशैवैतेषष्ठ्युत्तरशतत्रयं समाभोक्ष्यंतिपृथिवींकुरुश्रेष्ठकलौनृपाः महानंदिसुतोराजन्शूद्रीगर्भोद्भवोवली ७ महापद्मपतिःकश्चिन्नंदःक्षत्रविनाशकृत ततोनृपाभविष्यंतिशूद्रप्रायास्त्वधार्मिकाः ८ स एकछत्रांपृथिवीमनुल्लंघितशासनः शासिष्यतिमहापद्मोद्वितीयइवभार्गवः ९

नंदःसुतः १ नंदोनामकश्चिन्महापद्मसंख्यायाःसेनायाःधनस्यवापतिर्भविष्यतिअतएवमहापद्मइत्यपितस्यनाम ८ एकमेवछत्रंयस्यांतांपृथिवींशासिष्यतिपालयिष्यतितत्रोत्सादनेदृष्टं

तः भार्गवः द्वादशस्क ५

श्री·
भा·द्वा·
२

समाः संवत्सरान् ९ नवनंदान्नतेद्वं चतत्पुत्रांश्चैवं नवप्रपन्नान् विश्रस्तान् विख्यातान् द्विजः कौ
टिल्यवात्स्यायनादिपर्यायश्चाणक्य उद्धरिष्यति उन्मूलयिष्यति मौर्याः मौर्यसंज्ञाः ९ कथं भो।
क्ष्यंति तदाह स एवेति चंद्रगुप्तं मौर्यप्रथमं १२ १३ तेषां प्रथमो दृष्टारथः पराक्रमादिभिर्दृष्टो।

तस्य चाष्टौ भविष्यंति सुमाल्यप्रमुखाः सुताः य इमां भोक्ष्यंति महीं राजानः स्म शतं समाः ९
नवनंदान्द्विजः कश्चित्प्रपन्नानुद्धरिष्यति तेषामभावे पृथिवीं मौर्या भोक्ष्यंति वै कलौ
स एव चंद्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति तत्सुतो वारिसारस्तु ततश्चाशोकवर्द्धनः १२ सुयशा
भविता तस्य संगतः सुयशःसुतः शालिशूकस्ततस्तस्य सोमशर्मा भविष्यति १३ शत
धन्वा ततस्तस्य भविता तद्बृहद्रथः मौर्या ह्येते दश नृपाः सप्तत्रिंशच्छतोत्तरम् १४ समा
भोक्ष्यंति पृथिवीं कलौ कुरुकुलोद्वह अग्निमित्रस्ततस्तस्मात्सुज्येष्ठो भविता ततः वसुमि
त्रो भद्रकश्च पुलिंदो भविता ततः १५ ततो घोषः सुतस्तस्माद्वज्रमित्रो भविष्यति ता
ततो भागवतस्तस्माद्देवभूतिः कुरूद्वह १६ शुंगा दशैते भोक्ष्यंति भूमिं वर्षशताधिकं
१२

त्रायत्तसंख्येयस्तेनह मौर्या दश नृपाः सप्तत्रिंशोत्तरं सप्तत्रिंशदुत्तरं शतं समाः १४ बृहद्रथस्य सेनाप
तिः पुष्यमित्रो नाम स्वामिनं हत्वा राज्यं करिष्यति १५ स च शुंगानां प्रथमः ततोऽग्निमित्रादयो।
नवेत्येवं शुंगा दश वर्षशताधिकं वर्षशतम् १६ १७ ॥

कथंकरणावान्यास्थतित्तदाहम्शृंगारमितिपरस्त्रीकामिनं देवभक्तिनामानं शृंगारंहत्वानदमान्योवसन्देवना
माकणठोराज्यंकरिष्यति १६ कणठानांचत्तर्थः सप्तमोरमेचवसन्देवाह्वयः कणठायनाः वर्षाणां

तत्रकणठानियंभूमिर्यास्यत्यव्ययाणोत्त्वप १७ शृंगारंहत्वादेवभक्तिकणठमान्यस्त्रकामिनं
स्वयंकारिष्यतेराज्यंवसन्देवोमहामतिः १८ तस्यपुत्रस्तथाभित्रस्तस्थानारायणः सुतः कणठा
यनारमेभूमिंचत्वारिशद्वर्षपंचच शतानित्रीणिभोक्ष्यंतिवर्षाणांचकलौयुगे १९ हत्वाकाणठं
सप्तमोरमेणतत्त्यो ह्षलोवली नंभोक्ष्यत्यजातीयः कंचिकालमसंजमः २० कृत्ननामा
र्थेनक्षातामविताण्ृथिवीपतिः श्रीशृणतकर्णस्तत्पुत्रः पौर्णमासस्कृतस्सुतः २१ लंबोदर
स्ततपुत्रस्तस्मात्द्विविलकोनृपः मेवस्वातिसूर्विलकाटटमानस्तत्स्सुतः २२ अनि
ष्टकर्माहालेयस्तलकस्तस्यचात्मजः पुरीषभीरुस्तत्पुत्रस्ततोराजासुनंदनः २३ चकारो
वटकोपत्रशिवस्वातिररिंदम तस्यापिगोमतीपुत्रः पुरीमानभविताततः २४ मेदशिराः
शिवस्कंधोयज्ञश्रीस्तत्सुतस्ततः विजयस्तत्सुतोभाव्यश्चन्द्रविज्ञः सलोमधिः २५ एतेत्रि
शन्नृपतयश्चत्वार्यब्दशतानिच षट्पंचाशञ्चपृथिवींभोक्ष्यंतिकुरुनंदन २६

त्रीणिशतानिपंचचत्वारिंशद्वर्षाणिचभूमिंभोक्ष्यंति १९ कणठानामेनिमंसप्तमेणहत्वाबलिहि
कनामानकृत्योगांभोक्ष्यति २० २१ २२ २३ यत्रयेषुवहूषसंत्तेषुश्रप्तनवमः शिवस्वातिनामाभ

भा°
द्वा°
९

आवभृत्याः अवभृतिर्नगरी तद्राजानः २७ २८ एते आभीरादयो मौनान्ता अतिरिक्ताः पंचषष्टिनृपा ए
कोनषष्ट्यधिकं वर्षसहस्रं पृथिवीं भोक्ष्यंतीति ततः पूर्वोक्ता एवैकादश मौनाः त्रीण्येव शतानि क्षि
तिं भोक्ष्यंति तैः संस्थितेषु मौनेषु मृतेषु किलिकिलायां पुर्यां नृपतयो भविष्यंति भूतनंदेनान्वयः

सप्ताभीरा आवभृत्या दश गर्दभिनो नृपाः कंकाः षोडश भूपाला भविष्यंति च लोलुपाः
ततोष्टौ यवना भाव्याश्चतुर्दश तुरुष्ककाः भूयो दश गुरुंडाश्च मौना एकादशैव तु २८ ए
ते भोक्ष्यंति पृथिवीं दश वर्षशतानि च नवाधिकां च नवतिं मौना एकादश क्षितिं २९ भो
क्ष्यंत्यः शतान्यंग त्रीणि तैः संस्थिते ततः किलिकिलायां नृपतयो भूतनंदोथ वंगिरिः
शिशुनंदिश्च तद्भ्राता यशोनंदिः प्रवीरकः इत्येते वै वर्षशतं भविष्यंत्यधिकानि षट् ३१
तेषां त्रयोदश सुता भवितारश्च बाह्लिकाः पुष्यमित्रोथ राजन्यो दुर्मित्रोस्य तथैव च ३२
एककाला इमे भूपाः सप्तांध्राः सप्त कौशलाः वैदूरपतयो भाव्या निषधास्तत एव हि ३३

२९ अधिकानि षट् च षट् वर्षाणि ३० तेषां भूतनंदादीनां यवनानां पंच बाह्लीकास्तन्नामानस्त्रयो
दश सुता भविष्यंति अथ पुष्यमित्रो नाम कोप्यराजन्यः अस्य च दुर्मित्रो नाम पुत्रः ३२ तथा आं
ध्राः कौशलाः वैदूरपतयः निषधाश्च एते तत्तद्देशनामभिः प्रख्याताः स्तल्पकालाः खिरंमेउ

२ क्षेष्मा: तत एव ते भोवाह्लिकं भ्रप्रवभावाय भविष्यंति ३३

ततश्च मागधानां तु राजा विश्वस्फूर्जिर्नाम भविता स च पूर्वोक्तात् पुरंजयात्परः पुरंजय इति प्रसिद्धः स
न्‌ वर्णान्‌ ब्रह्मणादीन्‌ पुलिंदयदुमद्रकसंज्ञान्‌ म्लेच्छप्रायान्‌ करिष्यति अपरानिति पाठे अन्यान्‌ पुलिं
दादिसंज्ञान्‌ वर्णान्‌ करिष्यतीत्यर्थः ५४ स च एवं कृत्वा अब्रह्मभूयिष्ठाः ब्रह्मज्ञानं अध्ययनं वा ब्रह्मवेदं ब्रह्म वा
तद्रहितं अन्नैर्वैर्वर्णप्रचुरा अस्वतीः प्रजाः स्थापयिष्यति पालयिष्यति स च पद्मावत्यां पुरि अनुगंगा
गाद्वा प्रयागं गयां पर्यंतं अनुगालितां पालितां मेदिनीं भोक्ष्यतीति ५५ तदनंतरं च सौराष्ट्रादिदेशान्

मागधानां तु भविता विश्वस्फूर्जिः पुरंजयः करिष्यत्यपरो वर्णान्‌ पुलिंदयदुमद्रकान्‌ ५४ प्रजा
श्चाब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः वीर्यवान्‌ क्षत्रमुत्साद्य पद्मावत्यां स वै पुरि अनुगं
गाप्रयागं गयां भोक्ष्यति मेदिनीं ५५ सौराष्ट्रावंत्याभीरांश्च शूरान्‌ अर्बुदमालवान्‌ व्रात्या द्विजा
भविष्यंति शूद्रप्राया जनाधिपाः ५६ सिंधोस्तटं चंद्रभागां कौंतीं काश्मीरमंडलं भोक्ष्यंति शूद्रा
व्रात्याद्या म्लेच्छाश्चाब्रह्मवर्चसः ५७ तुल्यकाला इमे राजन्‌ म्लेच्छप्रायाश्च भूभृतः एते धर्मानृत
पराः फल्गुदास्तीव्रमन्यवः स्त्रीबालगोद्विजघ्नाश्च परदारधनादृताः उदितास्तमितप्राया अल्प
सत्त्वाल्पकायुषः ५८ असंस्कृताः क्रियाहीना रजसा तमसावृताः प्रजास्ते भक्षयिष्यंति म्लेच्छा
नार्यरूपिणः ६० तैनाथ्यास्ते जनपदास्तच्छीलाचारवादिनः अन्योन्यतो राजभिश्च क्षयं यया।

तिनो द्विजा व्रात्या उपनयनरहिता भविष्यंति ५६ अब्रह्मवर्चसः वेदाचारशून्याः ५७ इमे च म्लेच्छप्राया
भूभृतः तुल्यकाला भविष्यंति किं च एते सर्वे अधर्मानृतपराः अधर्मे अनृते च परे निष्ठिताः फल्गुदा
अल्पदाः अल्पप्रदाः ५८ उदितास्तमितप्रायाः हर्षशोकादिव्याकुलाः ५९ असंस्कृताः गर्भाधाना

भा
द्वा
४

द्वितीयेन कलेर्दोषवृद्धो कल्पावतारतः अथ संक्षेपेन नेनेत प्रपुनः कृतयुगागमः १ कलिधर्मान्प्रपंचय
तितेनत्रेतु न्यायादिना १ धर्मन्याययोर्मव्यवस्थायां बलमेव हि २ द्वापरे देवतिभावे अभिरु विरे वहेतः
नकुलगोत्रादिप्यावहारिके क्रयविक्रया दौ स्त्रीनेपुत्वे चनयो श्रेष्ठे रति कोपालामवे हेतः नकु
लमात्रावा १ अश्रमाणां न्यानो त्वान लिंगमेव दशजिनादिके हेते न्याचारावि पोषः अन्यो पत्ति
कारणं च आश्रमादा श्रमीन रंप्राप्नोच कारणं यद्वा वहूदकं हंसादीनाम् अन्योन्यापत्तो नमस्कारादि

अ ३ व ततश्चानुदिनं धर्मः सत्यं शौचं क्षमा दया कालेन बलिना राजन्नंक्ष्यत्यायुर्बलं स्मृ
तिः १ वित्तमेव कलौ नृणां जन्माचारगुणोदयः धर्मन्यायव्यवस्थायां कारणं बलमेव हि २ दा
पत्येभिरुचिर्हेतुर्मायैव व्यावहारिके स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्रत्वे सूत्रमेव हि ३ लिंगमेवाश्र
मख्यातावन्योन्यापत्तिकारणं अवृत्त्या न्यायदौर्बल्यं पाण्डित्ये चापलं वचः ४ अनाढ्यतैवासा
धुत्वे साधुत्वे दम्भ एव तु स्वीकार एव चोद्वाहे स्नानमेव प्रसाधनं ५ दूरे वार्ययनं तीर्थं लावण्यं
केशधारणं उदरंभरता स्वार्थः सत्यत्वे धार्ष्ट्यमेव हि ६ दाक्ष्यं कुटुम्बभरणं यशोर्थे धर्मसेवनं एवं प्र
जाभिर्दुष्टाभिराकीर्णे क्षितिमण्डले ७ ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः प्रजा हि
लुब्धै राजन्यैर्निर्घृणैर्दस्युधर्मभिः ८ आच्छिन्नदारद्रविणा यास्यन्ति गिरिकाननं पाकमूला

वहारे कारणं अवृत्त्या मद्रार्थणा दिना सामर्थ्येन न्यायदौर्बल्यं पराजयः चापलं वचः वहुभाषणं ८
असाधुत्वे चौर्यादिष्वभियोगे अहमकाकी निःस्पृहः पवनस्कारं नक रोतिसा धुत्वे दम्भ एव उद्वाहे विवाहे
स्वीकारः न तु स्नानं हृष्टिः स्नानमेव प्रसाधनमलंकारः न तु योग्यस्नानं ५ दूरे वर्तमानं वार्यपनं जलं
प्राप्य तीर्थं न तु गंगादि लावण्यं केशधारणमेव उदरंभरता स्वार्थः पुरुषार्थः स

क्षीयमाणेष्वित्यादीनां मिथ्यं कलौ गतप्रायइति पंचमेनान्वयः क्षीयमाणेषु अल्पप्रमाणेषु १२ दस्यु
प्रायेषु चौरतुल्येषु चौर्यानृतवृथाहिंसाद्याः नानावृत्तयो येषां तेषु १३ छागप्रायास्वल्पप्रमाणासु तीरा
तेष्वप्रजातत्वासु १४ स्थाणुषु वृक्षेषु विद्युत्प्रायेषु तडिद्दलेषु शून्यप्रायेषु धर्मादिरहितेषु स
द्मसु गृहेषु १५ जनेषु खरधर्मिणि खरः सहचेष्टिते कलौ गतप्राये समाप्तप्राये १६ एतत्पंचपतिच

अनावृष्ट्या विनंक्ष्यंति दुर्भिक्षकरपीडिताः शीतवातातपप्रावृड्हिमैरन्योन्यतः प्रजाः १० क्षुत्तृ
ड्भ्यां व्याधिभिश्चैव संतप्स्यंते च चिंतया त्रिंशद्विंशतिवर्षाणि परमायुः कलौ नृणां ११ क्षीय
माणेषु देहेषु देहिनां कलिदोषतः वर्णाश्रमवतां धर्मे नष्टे वेदपथे नृणां १२ पाखंडप्रचुरे ध
र्मे दस्युप्रायेषु राजसु चौर्यानृतवृथाहिंसानानावृत्तिषु वै नृषु १३ शूद्रप्रायेषु वर्णेषु छाग
प्रायासु धेनुषु गृहप्रायेष्वाश्रमेषु यौनप्रायेषु बंधुषु १४ अणुप्रायास्वोषधीषु शमीप्रायेषु स्था
णुषु विद्युत्प्रायेषु मेघेषु शून्यप्रायेषु सद्मसु १५ इत्थं कलौ गतप्राये जनेषु खरधर्मिणि ध
र्मत्राणाय सत्त्वेन भगवानवतरिष्यति १६ चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः धर्मत्रा
णाय साधूनां जन्म कर्मापनुत्तये १७ शंभलग्राममुख्यस्य ब्राह्मणस्य महात्मनः भवने विष्णु
यशसः कल्किः प्रादुर्भविष्यति १८

तर्हि चराचरगुरोरीश्वरस्यैव धर्मत्राणे हेतुः ग्रहणेश्वरत्वेयो रूपणात् तं अखिलस्य विश्वस्यात्मनः का
रणस्येति एवंभूतस्य हरेर्जन्म साधूनां धर्मत्राणाय प्रयोजनमाह कर्मापनुत्तये मोक्षाय १७ शंभ
लग्रामे मुख्यस्य प्रधानस्य नाम्ना विष्णुयशसः ब्राह्मणस्य भवने गृहे अजो भविष्यति न जातः इत्यर्थः १८

३

भा॰ द्वा॰ ५

धर्मत्राणप्रकारमाह अश्वमिति असाधवो दम्यंते येन तत्तमश्वमारुह्यासिना दस्यून्कोटिशो निहनिष्य
तीत्युत्तरेणान्वयः असाधुदमनमिति पाठे कल्किविशेषणं १९ तत्प्रपंचः आशुना शीघ्रगामिना तेन
हयेन क्षोण्यां विचरन् अणिमाद्यष्टैश्वर्यगुणाश्च सत्यसंकल्पादयः तैरन्वितः नृपलिंगच्छदः राजवे
षच्छन्नान् २० ततश्च पुनः कृतयुगप्रवृत्तिक्रममाह अथेति सार्द्धैस्त्रिभिः तेषां पौरजानपदानां मनांसि वि
शदानि भविष्यंति तत्र हेतुः वासुदेवस्यांगरागेण चंदनादिनातिपुण्यगंधो योऽनिलस्तस्पृशामिति तत्पा

अश्वमाशुगमारुह्य देवदत्तं जगत्पतिः असिनासाधुदमनमष्टैश्वर्यगुणान्वितः १९ विचरन्नाशु
नाक्षोण्यां हयेनाप्रतिमद्युतिः नृपलिंगच्छदो दस्यून्कोटिशो निहनिष्यति २० अथ तेषां भ
विष्यंति मनांसि विशदानि वै वासुदेवांगरागातिपुण्यगंधानिलस्पृशां २१ पौरजानपदानां
वै हतेष्वखिलदस्युषु तेषां प्रजाविसर्गश्च स्थविष्ठः संभविष्यति २२ यदावतीर्णो भगवान्क
पति ल्किर्धर्मपतिर्हरिः कृतं भविष्यति तदा प्रजासूतिश्च सात्त्विकी २३ यदा चंद्रश्च सूर्यश्च तथा ति
ष्यबृहस्पती एकराशौ समेष्यंति तदा भवति तत्कृतम् २४

तेषां २१ २२ स्थविष्ठः स्थूलः २२ कृतयुगप्रवृत्तिमाह यदावतीर्ण इति प्रजानां सूतिः प्रसूतिः २३
तदवतारकालोपलक्षणमाह यदा चंद्रश्चेति तिष्यः पुष्यः अयमर्थः चंद्रसूर्यबृहस्पतीनां यदा पु
ष्यनक्षत्रे योगः तदा तत्कृतयुगं भविष्यतीति यद्यपि प्रतिद्वादशवर्षं कर्कटराशौ बृहस्पतेर्वर्त्तमा
ने द्वित्र्यमावास्यासु तेषां त्रयाणामपि पुष्ययोगः संभवति तथापि तेषां सह प्रवेशोऽत्र विवक्षितः ८

एवंनवमस्कंधमारभ्यानुक्रांतंवैवस्वतमनोर्वंशद्वयंनिगमयति येतीतेति उद्देशतः संक्षेपतः २५
कलियुगाद्वर्तमानविप्रोपेवनुमाह आरभ्यत्याहिना वर्षसहस्रंपंचदशोत्तरंशतंचेतिकथायावि
वक्षयांवर्तते संख्येयंवस्तुतः परीक्षिन्नंदयोरंतरंद्वाभ्यामूनंवर्षाणांसार्द्धसहस्रंभवतियतः परीक्षित्स
मकालेमागधिमार्जारिमारभ्यरिपुंजयांताविंशतोराजानः सहस्रंसंवत्सरंभोक्ष्यंतीत्युक्तेनवमस्कंधेयेये
बार्हद्रथभूपालाभाव्याःसहस्रवत्सरमितिततः पंचप्रद्योतनाअष्टत्रिंशच्छतंनेषिशुनागाश्चषष्ट्युत्तर
शतत्रयंभोक्ष्यंतिपृथिवीमित्यत्रैवोक्तत्वात् २६ कलेः प्रवृत्तिवृद्धिंनिरूपयितुंकालज्ञानोपलक्षणमा

येतीतावर्तमानायेभविष्यंतिचपार्थिवाः तेतउद्देशतः प्रोक्तावंशीयाः सोमसूर्ययोः २५ आर
भ्यभवतोजन्मयावन्नंदाभिषेचनं एतद्वर्षसहस्रंतुशतंपंचदशोत्तरं २६ सप्तर्षीणांतुयौपूर्वौदृ
श्येतेनुदितौदिवि तयोस्तुमध्येनक्षत्रंदृश्यतेयत्समंनिशि २७ तेनैतेऋषयोयुक्तास्तिष्ठंत्य
ब्दशतंनृणां तेत्वदीयेद्विजाःकालेअधुनाचाश्रितामघाः २८ ॥

ह सप्तर्षीणामिति अयमर्थः प्रागग्रप्राकटाकारंजनाममकंसप्तर्षिमंडलेनतत्रकिंचिदुन्नतेतेषामग्रा
स्थानेयेमरीचिः ततः पश्चादासनमयुगकंयरकात्रेवसिष्ठः सभार्यः ततः पश्चाद्दीर्घउन्नतेतेषामल
स्थानीयेगिराः ततः पश्चाच्चत्रस्तनाराचनक्के रपाभोत्रिः ततोदक्षिणतः पुलस्त्यः पुलस्त्यादाग्नि
मतः पुलहः ततोनंतरतः क्रतुः एवंस्थितानेषांमध्येयौपूर्वौउदयसमयेप्रथममुदितौपुलहक्रतूनसंगौतयो
लमध्येनयोत्तरपूर्वयोर्मध्येयन्नक्षत्रंदक्षिणोत्तरःसमदेशावस्थितमाश्विन्यादिषुपदत्वेनमतंतेननक्षत्रेण
ते २७ तेनतस्यैवयुक्तानराणामब्दशतंतिष्ठंतितेचद्विजास्त्वदीयेकालेअधुनामघाआश्रितावर्तंते २८

भा॰
द्वा॰
६

तेषु मघासु वर्तमानेषु सत्सु पदा विष्णोर्भगवतो भानुः प्रकाशात्मको देहः दिवं वैकुंठं गतः तदा कि
लियुगमविशत् यत्र यस्मिन् युगे जनः पापं रमते इति कलियुगस्य लक्षणम् २९ ननु श्रीकृष्णे पृथिव्यां
वर्तमानेऽपि किं यथा न रूपेण कलिः प्रविष्ट एवासीत् तत्पादप्रभावेन स्वपराक्रमो नाभवदित्याह यावदिति
पराक्रांतुं भूमिमभिभवितुं ३० अतो य उक्त एव कलिप्रवेशकालस्तमाह यदा देवर्षय इति द्वादशाब्दश
तात्मक इति दिव्यमानेन संध्यांशाभ्यां सह द्वादशशतात्मकः स कलिः तदा मघामतिक्रम्य प्र

विष्णोर्भगवतो भानुः कृष्णाख्योसौ दिवं गतः तदाविशत्कलिर्वै पृथिवीं पराक्रांतुं न चाशकत्
यावत्स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः तावत्कलिर्लोकं पापे यद्रमते जनः २९ यदा देव
र्षयः सप्त मघासु विचरंति हि तदा प्रवृत्तस्तु कलिर्द्वादशाब्दशतात्मकः ३१ यदा मघाभ्यो
यास्यंति पूर्वाषाढां महर्षयः तदा नंदात्प्रभृत्येष कलिर्वृद्धिं गमिष्यति ३२ यस्मिन्कृष्णो दिवं
यातस्तस्मिन्नेव तदाहनि प्रतिपन्नं कलियुगमिति प्राहुः पुराविदः ३३ दिव्याब्दानां सहस्रा
न्ते चतुर्थे तु पुनः कृतं भविष्यति तदा नृणां मन आत्मप्रकाशकम् ३४ ॥

विश्यत्यर्थः ३१ कलेः प्रवेशकालमभिधाय तस्य वृद्धिकालमाह यदेति तदा प्रद्योतनात्प्रभृति वृद्धिं ग
च्छन्नंदात्प्रभृति वृद्धिं गमिष्यतीत्यर्थः ३२ ननु यदा कालेऽलिंगमुपलब्धं तदैव प्रविष्ट इति युक्तं न तु
पूर्वमेव प्रवेशः ततः परं वृद्धिरित्यत्र किं प्रमाणं तत्राह यस्मिन्निति प्रतिपन्नं प्रविष्टमिति ज्ञा
तं पुराविदः एवं जानन्ति परं वा ३३ कलेरनंतरं कृतयुगप्रवेशमाह दिव्याब्दानामिति चतुर्थे कलौ
प्रवेशानंतरं यत्परिमितं तेनांशेनापि सहान्ते तस्मिन्नित्यर्थः कृतयुगप्रवेशचिह्नमाह यदा नृणां मनः आ

एतत्वं प्रोक्तां स्थितिं ग्रासपर्यन्तादिवं प्रोष्यतीति दिशति इत्येषा इति यथायाभि हवनीयावस्थामितां स्थाग्रवा-
स्थावेषणाइतिचपादः ३७ एतत्कीर्तनस्यैवैश्वर्यप्रयोगेतिनामह एतयामिति नामैवलिंगं तापकं येषां तेषांक
थामात्रेणैवावशिष्टानां कीर्तिरेवस्थितानान्तराज्यंपुत्रादयो वा ३६ कलावुत्सन्नानां राज्यंवंशप्रादुर्भावेन पुनः प्रवृ
त्तिप्रकारमाह देवापिः सोमवंशजः मरुः सूर्यवंशजः कलापग्रामो नाम योगिनामावासः प्रसिद्धः ३७ ३८
इममेवप्रकारं प्रतिचतुर्युगं प्रदर्शयति कृतमिति ३९ एतेषां नामलिंगानामित्यादि यद्भक्तत्रयं च यति

इत्येषमानवो वंशो यथासंख्यायते भुवि तथा विट्शूद्रविप्राणां वंशा ज्ञेयायुगेयुगे ३५ एतेषां नाम
लिंगानां पुरुषाणां महात्मनां कथामात्रावशिष्टानां कीर्तिरेव स्थिता भुवि ३६ देवापिः शन्तनोर्भ्रा
तामरुश्चेक्ष्वाकुवंशजः कलापग्राम आसाते महायोगबलान्वितौ ताविहेत्य कलेरन्ते वासुदेवान
शिक्षितौ वर्णाश्रमयुतं धर्मं पूर्ववत्प्रथयिष्यतः ३७ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगं अ
न नेनक्रमयोगेन भुवि प्राणिषु वर्तते ३८ राजन्नेते मया प्रोक्ता नरदेवास्तथापरे भूमौ ममत्वं कृत्वान्ते क
हित्वेमां निधनं गताः ४० क्रिमिविड्भस्मसंज्ञान्ते राजनाम्नोपि यस्य च भूतध्रुक् तत्कृते स्वा
र्थं किं वेद निरयो यतः ४१ कथं सेयमखण्डा भूः पूर्वैर्मे पुरुषैर्धृता मत्पुत्रस्य च पौत्रस्य मत्पूर्वा वंश
जस्य च ४२ तेजोवन्नमयं कायं गृहीत्वात्मतयाबुधाः महीं ममतया चोभौ हित्वान्तेऽदर्शनं गताः ४३

एतत्त्रितयं भी ४ ममत्वं कृत्वेत्यनेन भूतान्विभक्तद्रोहहत्वं निर्दिशति कृमीति राजनाम्नः राजेति नाम यस्य
तस्मादिदेहस्यान्ते कृमयो विष्ठा भस्मेति वा संज्ञा भविष्यति तत्कृते तदर्थं यो भूतध्रुक् भूतद्रोही स्या
त्स किं स्वार्थं वेद जानाति यतो हि तेन भूतद्रोहेण निरयो भवतीति ४१ म

मत्वप्रकारं प्रपंचयति कथमिति सेयमखण्डा भूमिः मे पूर्वजैः पुरुषैर्धृतासीदिदानीं
मत्पूर्वा च स्यान्मत्पुत्रादेः कथं स्यादित्येवं ४२ उभौ महीं कायं चास्मदर्शनं गताः ४३

भा० टी० ६

रुपसंहरति ययेति तेसर्वेवकथामात्राःक्रियमाणाः सकथामात्राःकालेनकृताः ४४ इति श्री द्वादशस्कं
धे द्वितीयोध्यायः ॥२॥ तृतीयेभूमिगीतेनराजदोषादिवर्ण्यते कलौचदोषभूयिष्ठेदोषघ्नंचहरेर्यशः इति
१ देहेहंताममताकर्तव्यतान्युदस्यत्नतेयंभूमिगीतैः प्रपंचयति दृष्ट्वात्मनीत्यादिना आत्मनि
पृथिव्यांजयव्यग्रान्दृष्ट्वा कौतुकंनर्हाप्रकारमाह अहोइति येनकामेनफेनोपमेपिंडेदेहे विश्रंभिता विश्वासंनी
तायेतेषांनरेंद्राणांसएषकामोमोघएवस्यात् २ काममेवदर्शयति द्वाभ्यां पूर्वमिति ३ द्विपार्थंलप

येयेभूपतयोराजन्भुंजंतिभुवमोजसा कालेनतेकृताःसर्वेकथामात्राःकथासुच ४४ ॥ इ
ति श्री द्वादशस्कंधे द्वितीयोध्यायः २॥ शुकउवाच॥ दृष्ट्वात्मनिजयेव्यग्रान्नृपान्हसतिभूरियं १
अहोमांविजिगीषंतिमृत्योः क्रीडनकानृपाः १ कामएषनरेंद्राणांमोघःस्याद्विदुषामपि ये
नफेनोपमेपिंडेयेतिविश्रंभिताःनृपाः २ पूर्वंनिर्जित्यषड्वर्गंजेष्यामोराजमंत्रिणः ततःस
चिवपौरान्करींद्रानस्यकंटकान् ३ एवंक्रमेणजेष्यामः पृथ्वींसागरमेखलां इत्याशाब
द्धहृदयानपश्यंत्यंतिकेंतकं ४ समुद्रावरणांजित्वामांविशंत्यब्धिमोजसा कियदात्मज
यस्यैतन्मुक्तिरात्मजयेफलं ५ यांविसृज्यैवमनवस्तत्सुताश्चकुरूद्वह गतायथागतंयुद्धेतां
मांजेष्यंत्यबुद्धयः ६

दस्यात्मजयस्यमुक्तिःस्यादितिप्रथमंसिद्धियषड्वर्गंनिर्जित्यराजमंत्रिणोजेष्यामः वशीकरिष्यामः सचिवाः
अमात्याः करींद्राहस्तिपाः तान्अजेष्यामः कंटकान्प्रतिपक्षान् अस्यअस्यअपरस्यकंटकानितिवा
पाठः ३ एवंकेचिदाशयाबद्धहृदयाः ४ एवंकेचित्समुद्रंजित्वानाथंतिसमुद्रंप्रविशंतितदेवसिद्ध
यजेयंतेषांन्यासायपितसिद्धंततोनिमेदादिजयापि कियदिति अतः अजितकनक्षुद्रजितोपकं ५ नतेषां

अवष्टभ्य स्वयुक्तेन त्वश्चयति महत्तरति ॥ १८ रामो नाम कश्चिद्राजा यद्वा लोकरक्षणार्थं पृथिव्यां निदिष्टः
११ लोकं रावयति रोदयतीति लोकरावणः ॥ ११ १२ अपि रक्षे मेऽमनो कृतार्थेऽप्रवर्तते न केलोन कथावशे
षाः कृताः विभो इति संबोधनं त्वरङ्ग इतिवत् ॥ १२ राजवंशानां कथनस्य तात्पर्यमाह कथावशेषा योऽमु ।
मत्कृते पितरं पुत्रा भ्रातरं वापि विग्रहः नाथ ते सम्मतो राज्ये ममता बद्धचेतसो ॥ १ ममैवेयं मही
कृत्स्ना न तेऽसुत इति वादिनः स्पर्द्धमाना मिथो घ्नन्ति स्त्रियन्ते मत्कृते नृपाः ॥ ८ पृथुः पुरूरवा गाधिर्न
हुषो भरतोऽर्जुनः मान्धाता सगरो रामः खट्वाङ्गो धुन्धुहा रघुः ॥ ९ तृणविन्दुर्ययातिश्च शर्यातिः शन्त
नुर्गयः भगीरथः कुवलयाश्वः ककुत्स्थो नैषधो नृगः ॥ १० हिरण्यकशिपुर्वृत्रो रावणो लोक
रावणः नमुचिः शम्बरो भौमो हिरण्याक्षोऽथ तारकः ॥ ११ अन्ये च बहवो दैत्या राजानो ये महे
श्वराः सर्वे सर्वविदः शूराः सर्वे सर्वजितोऽजिताः ॥ १२ ममतां मय्यवर्तन्त कृत्वोच्चैर्मर्त्यधर्मिणः
कथावशेषाः कालेन ह्यकृतार्थाः कृता विभो ॥ १३ कथा इमास्ते कथिता महीयसां विताय लो
केषु यशः परेयुषां विज्ञानवैराग्यविवक्षया विभो वचोविभूतीर्न तु पारमार्थ्यम् ॥ १४ यस्तूत्त
मश्लोकगुणानुवादः सङ्गीयतेऽभीक्ष्णममङ्गलघ्नः तमेव नित्यं शृणुयादभीक्ष्णं कृष्णेऽमलां
भक्तिमभीप्समानः ॥ १५
ति विज्ञाने विषयासारतानां ततो वैराग्यं तयोर्विवक्षया परेयुषां मृतानां वचोविभूतीः वाक्यवि
लासमात्ररूपाः पारमार्थ्यं परमार्थयुक्तं कथनं भवतीत्यर्थः ॥ १४ कस्तर्हि गुणानामुपादेयः परमा
र्थः तमाह यस्त्विति नित्यं ग्रन्थहंततत्र्याप्यभो दशम ॥ १५ ॥

भा० द्वा० ८ कलिदोषोपचयेऽपि भक्तेः स्वैरं मन्यमानः पृच्छति केनोपायेनेति विधमिष्यन्ति नाशयिष्यन्ति यथा-
वद्यथावत् १६ कलियुगे कः परमो धर्म इति बुभुत्सया पृच्छति युगानीति ब्रूहीत्यनुषङ्गः मानं कति
कालस्य पुनः पृच्छति प्रलयकल्पयोः संहारस्थितिकालयोः न चायं वहिः संवेः सम्यगाह का-

राजोवाच॥ केनोपायेन भगवन् कलेर्दोषान् कलौ जनाः। विधमिष्यन्त्युपचितांस्तन्मे ब्रूहि यथा
मुने १६ युगानि युगधर्मांश्च मानं प्रलयकल्पयोः। कालस्येश्वररूपस्य गतिं विष्णोर्महात्म-
नः १७ श्रीशुक उवाच॥ कृते प्रवर्तते धर्मश्चतुष्पात्तज्जनैर्धृतः। सत्यं दया तपो दानमिति
पादा विभोर्नृप १८ संतुष्टाः करुणा मैत्राः शान्ता दान्तास्तितिक्षवः। आत्मारामाः समदृशः
प्रायशः श्रमणा जनाः १९ त्रेतायां धर्मपादानां तुर्यांशो हीयते शनैः। अधर्मपादैरनृत
हिंसासंतोषविग्रहैः २० तदा क्रियातपोनिष्ठा नातिहिंस्रा न लम्पटाः। त्रैवर्गिकास्त्रयी
विद्या वर्णा ब्रह्मोत्तरा नृप २१

लस्येति १७ तत्र युगधर्मांस्तावदाह कृत इति तज्जनैस्तत्कालीनैर्जनैः धृतः स्वाश्रमे गोहेषु तत्
पादाः प्रथमस्कंधे तत्र देवप्रथमस्कंधे शौचं च पादोक्तो न तु विभोः स्वरूपस्य धर्मस्य १८ तदानीं तनजना-
नाह संतुष्टा इति मैत्राः सर्वमैत्रीयुक्ताः श्रमणाः आत्माभ्यासवन्तः १९ २० ब्रह्मोत्तरा ब्राह्मणा।

मनृतेनसत्यं हिंसयादया असंतोषेणतपः विग्रहेणदानमिति यथासंख्यंयोज्यं हिंसातुष्ट्यनृत
द्वेषैरितिपाठेक्रमोनविवक्षितः धर्मस्यार्द्धंह्रसतितैर्येन अधर्मस्यलक्षणैरस्मिंश्चिह्नैः पाठेरित्यर्थः २२ य
शस्विनः कीर्त्तिप्रधानाः क्षत्रद्विजोत्तमाः क्षत्रियब्राह्मणप्रधानाः २३ कलौधर्मपादानांतुर्यांशोऽत्रतुर्यांशो
वशिष्यते २४ शूद्रदासोत्तमाः शूद्रकैवर्त्तादिप्रधानाः गुणानामेवंभूतवैषम्येकारणमाह सत्वमिति

तपःसत्यदयादानेष्वर्द्धंह्रसतिद्वापरे हिंसातुष्ट्यनृतद्वेषैर्धर्मस्याधर्मलक्षणैः २२ यशस्विनो
महाशीलाः स्वाध्यायाध्ययनेरताः आढ्याः कुटुम्बिनोहृष्टावर्णाः क्षत्रद्विजोत्तमाः २३ कलौ
तुधर्महेतूनांतुर्यांशोऽधर्महेतुभिः एधमानैःक्षीयमाणोह्यन्तेसोपिविनंक्ष्यति २४ तस्मिंल्लु
ब्धादुराचारानिर्दयाः शुष्कवैरिणः दुर्भगाभूरितर्षाश्चशूद्रदासोत्तमाःप्रजाः सत्वंरजस्त
मइतिदृश्यन्तेपुरुषेगुणाः कालसंचोदितास्तेवैपरिवर्त्तन्तआत्मनि २६ प्रभवन्तियदासत्वे
मनोबुद्धीन्द्रियाणिच तदाकृतयुगंविद्याज्ज्ञानेतपसियद्रुचिः २७ यदाकर्म्मसुकाम्येषुभक्तिर्भ
वतिदेहिनां तदात्रेतारजोवृत्तिरितिजानीहिदेहिनां २८ यदालोभस्त्वसंतोषोमानोदंभोथ
मत्सरः कर्म्मणांचापिकाम्यानांद्वापरंतद्रजस्तमः यदामायानृतंतन्द्राहिंसाविषादनं ।
शोकमोहौभयंदैन्यंसकलिस्तामसःस्मृतः ३०

पंचभिः २६ मनश्चबुद्धिश्चेन्द्रियाणिचसत्वेयदाप्रभवन्तिप्रतिफलेनवर्त्तन्ते २७ यदाकर्मादिषुभक्तिःप्री
तिस्तदारजोवृत्तिप्रधानंत्रेतायुगमितिजानीहि २८ काम्यानांकर्म्मणांविषयेदाप्रीतिस्तत्तदारजस्त
मः प्रधानंद्वापरंजानीहि २९ विषादनंदुःखं ३० ॥

भा० द्वा० ५९

कलिदोषानन्ये च वदन्ति यस्मादित्यादिना यस्मात्कलेर्हेतोः क्षुद्रदृशो मन्दमतयः क्षुद्रभाग्याः अल्पभाग्याः।
महाशनाः बह्वाहाराः वित्तहीना अपि कामिनः स्वैरिण्यः स्वच्छन्दाः असत्यः अवशाः ३१ दस्यव उत्कृष्टाः
प्रचुरा येषु ते ३२ अव्रता विहिताचारशून्याः अशौचाः शौचशून्याः अव्रतवटवो ब्रह्मचारिणो भवेयुः कुटुम्बिनश्च
गृहस्थाः संन्यासिनश्च दानपरा भविष्यन्ति नित्यं भिक्षाटना भविष्यन्ति तपस्विनो वनस्था वनं हित्वा ग्रामवासा भविष्य
न्ति न्यासिनो यतयः अतिलोलुपा भविष्यन्ति ३३ पुनरपि स्त्रीणां स्वभावमाह ह्रस्वकाया इति कटुकभाषि

यस्मात्क्षुद्रदृशो मर्त्याः क्षुद्रभाग्या महाशनाः कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोऽसतीः ३१ द-
स्यूत्कृष्टा जनपदा वेदाः पाषण्डदूषिताः राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः अव्रता बटवो-
ऽशौचा भिक्षवश्च कुटुम्बिनः तपस्विनो ग्रामवासा न्यासिनोऽत्यर्थलोलुपाः ३३ ह्रस्वकाया महाहारा
भूर्यपत्या गतह्रियः शश्वत्कटुकभाषिण्यश्चौर्यमायोरुसाहसाः पणयिष्यन्ति वै क्षुद्राः किराटाः
कूटकारिणः अनापद्यपि मंस्यन्ते वार्तां साधु जुगुप्सिताम् ३५ पतिं त्यक्ष्यन्ति निर्द्रव्यं भृत्या अप्यखि-
लोत्तमम् भृत्यं विपन्नं पतयः कौलं गाश्चापयस्विनीः ३६ पितृभ्रातृसुहृज्ज्ञातीन्हित्वा सौरतसौहृ-
दाः ननान्दृश्यालसंवादा दीनाः स्त्रैणाः कलौ नराः ३७

ण्यः अप्रियवादिन्यः चौर्यं च माया च कपटं च उरु।
एव साहसं यासां ताः ३४ किंच किराटाः वणिजः पणयिष्यन्ति क्रयविक्रयादिव्यवहारं प्रवर्तयिष्यन्ति।
किंच सर्वे जना अनापद्यपि जुगुप्सितां निन्दितां वार्तां वृत्तिं साधु मंस्यन्ते ३५ सर्वोत्तममपि पतिं निर्द्रव्यं द्रव्यहीनं भृत्या
त्यक्ष्यन्ति पतयो भृत्यं विपन्नं रोगादिभिर्व्याप्तं त्यक्ष्यन्ति कौलं कुलपरंपरागतं त्यक्ष्यन्ति अपयस्विनीर्दुग्धदो
हाः ३६ सौरतं सुरतनिमित्तं सौहृदं येषां ते अत एव ननान्दारो भार्याभगिन्यः श्यालाः भार्याभ्रातरः तैः

मन्दोमंदलोचनंयेऽतितनंदुरितिवापाठः ३२

५

३९ ४० पिशाचसंदर्शाः पिशाचसदृशाः ४० काकिणिके विंशतिवराटकमात्रेप्यर्थे विग्रह्य स्नेहं विहाय वैरं
कृत्वा ४१ ४२ महान्तमनर्थमाह द्वाभ्यां कलाविति त्रिलोकनाथैरवनतं नमस्कृतं पादपद्मं यस्य तं न य
क्ष्यन्ति न यजन्ति पाखण्डैर्विभिन्नमतयो यथा कृतं चेतो येषां ते ४३ विवशो गृणन्नपि विमुक्ताः कर्मरूपाः

शूद्राः प्रतिग्रहीष्यन्ति तपोवेषोपजीविनः धर्मं वक्ष्यन्त्यधर्मज्ञा अधिरुह्योत्तमासनं ३८ नित्यमुद्वि
ग्नमनसो दुर्भिक्षकरकर्शिताः निरन्ने भूतले राजन्ननावृष्टिभयातुराः ३९ वासोन्नपानशयनव्य
वायस्नानभूषणैः हीनाः पिशाचसंदर्शा भविष्यन्ति कलौ प्रजाः कलौ काकिणिकेप्यर्थे विगृह्य त्य
क्तसौहृदाः त्यक्ष्यन्ति हि प्रियान्प्राणान्हनिष्यन्ति स्वकानपि ४१ न रक्षिष्यन्ति मनुजाः स्थविरौ पित
रावपि पुत्रान्सर्वार्थकुशलान्क्षुद्राः शिश्नोदरंभराः ४२ कलौ न राजन्जगतां परं गुरुं त्रिलोक
नाथानतपादपंकजं प्रायेण मर्त्या भगवन्तमच्युतं यक्ष्यन्ति पाखण्डविभिन्नचेतसः ४३ यन्नामधे
यं म्रियमाण आतुरः पतन्स्खलन्वा विवशो गृणन्पुमान् विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति
यक्ष्यन्ति न तं कलौ जनाः ४४ पुंसां कलिकृतान्दोषान्द्रव्यदेशात्मसंभवान् सर्वान्हरति चित्तस्थो
भगवान्पुरुषोत्तमः ४५ श्रुतः संकीर्तितो ध्यातः पूजितश्चादृतोपि वा नृणां धुनोति भगवान्हृ
त्स्थो जन्मायुताशुभं ४६

र्गलाः प्रतिबंधा यस्य सः ४४ तदेवं कलिदोषानुक्त्वा तन्निस्तारोपायमाह पुंसामिति षड्भिः
द्रव्यदेशात्मभिः संभवो येषां तान् चित्तस्थः चित्ते स्फुरितः ४५ ४६ ॥

प्रथमेवोपायेनात्मा इति सदृष्टांतमाह यथेति धातुजं ताम्रादिसंश्लेषजातं हेम्नो दुर्वर्णं रूपं सलिलस्य भावं मा-
लिन्यं तत्र स्थितो वह्निरेव हन्ति न तु मोपादि एवं योगिनामपि विष्णुरेव न तु योगादिकमित्यर्थः ४७ एतदेवा-
विवृणोति विद्येति विद्यातपःप्रभृतीदेवतोपासना ४८ आत्मभावं स्वस्वरूपं ४९ ५० इदानीं कलिं स्तौति द्वाभ्यां
कलेर्दोषनिधे राजन्निति ५१ तत्सर्वं हरिकीर्तनादेव कलौ भवति ५२ इति श्रीद्वादशस्कंधे तृतीयोऽध्यायः ३
वक्तव्यं वचनयोः कालरूपानैमित्तिकादयः तत्र संसारनिस्तारो हरिकीर्त्येव वर्ण्यते १ कलिदोषनिवर्तकं-

यथाहेम्निस्थितोवह्निर्दुर्वर्णंहंतिधातुजं एवमात्मगतोविष्णुर्योगिनामशुभाशयं ४७ विद्यातपः
प्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजप्यैः नात्यंतशुद्धिंलभतेंतरात्मायथाहृदिस्थेभगवत्यनं
ते ४८ तस्मात्सर्वात्मनाराजन्हृदिस्थंकुरुकेशवं म्रियमाणोह्यवहितस्ततोयासिपरांगतिं ४९ म्रि
यमाणैरभिध्येयोभगवान्परमेश्वरः आत्मभावंनयत्यंगसर्वात्मासर्वसंश्रयः ५० कलेर्दोषनिधेरा
जन्नस्तिह्येकोमहान्गुणः कीर्तनादेवकृष्णस्यमुक्तसंगःपरंव्रजेत् ५१ कृतेयद्ध्यायतोविष्णुंत्रेतायां
यजतोमखैः द्वापरेपरिचर्यायांकलौतद्धरिकीर्तनात् ५२ इति श्रीद्वादशस्कंधे तृतीयोऽध्यायः ३ श्रु
कउवाच ॥ कालस्तेपरमाण्वादिर्द्विपरार्धावधिर्नृप कथितोयुगमानंचशृणुकल्पलयावपि १

हरिनामसंकीर्तनादिकं स एव च कलौ परमो धर्म इति प्रश्नद्वयं स्तोतम केयचान्यत्पृष्टं प्रलयकल्पयोर्मानं।
ब्रूहीति तदिदानीं तृतीयस्कंधोक्तकालानुवादपूर्वकं निरूपयति कालस्त इति स कालः परमाण्वादिर्योधितं
परमाणुतामित्यादिना कालः कथितः चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमं संख्यातानि सहस्राणि द्वि

९ ग्रामादिपातनिवयुगमानंचकथितं १

तत्र कल्पमानमाह चतुर्युगेति यत्र चतुर्दश मनवः क्रमेण भवन्ति २ प्रलयस्तु त्रिविधः नैमित्तिकः प्राकृतिकः आत्यन्तिको नित्यश्चेति तत्र नैमित्तिकं प्रलयं मानसहितमाह तदन्त इति द्वाभ्यां तावान् चतुर्युगसहस्रप्रमाणः सैव ब्राह्मी रात्रिः ३ नैमित्तिकत्वं दर्शयति यत्र यदा विश्वसृक् श्रीनारायणः विश्वसात्कृत्य स्वस्मिन्नुपसंहृत्य शेते आत्मभूः ब्रह्मा च तस्मिन् शेते तयोरभेदविवक्षया वा

चतुर्युगसहस्रं तु ब्रह्मणो दिनमुच्यते स कल्पो यत्र मनवश्चतुर्दश विधीयते २ तदन्ते प्रलयस्तावान् ब्राह्मी रात्रिरुदाहृता त्रयो लोका इमे तत्र कल्पान्ते प्रलयाय हि ३ एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक् शेतेऽनन्तासनो विष्णुस्तानात्मसात्कृत्य चात्मभूः ४ द्विपरार्द्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः तदा प्रकृतयः सप्त कल्प्यन्ते प्रलयायैव ५ एष प्राकृतिको राजन् प्रलयो यत्र लीयते अण्डकोशस्तु संघातो विघात उपसादिते ६ पर्जन्यः शतवर्षाणि भौमो राजन्न वर्षति तदा त्वल्पसाराणि सत्त्वान्यल्पमहत्त्वमाणाः तथा द्विजाः ७ लयं यान्ति पालकैः कालेनोपद्रुताः प्रजाः ८ सामुद्रं ह्रदिकं भौमं रसं सर्वं स कोऽरविः रश्मिभिः पिबते घोरैः सर्वं
नैव विमुच्यते ९

ब्रह्मण एवानेनास्तमनेन नक्तं ब्रह्मणो निद्रानिमित्तीकृत्य प्रवर्तमानो लोकत्रयप्रलयो नैमित्तिक इत्यर्थः ४ प्राकृतिकं प्रलयमाह द्वाभ्यां द्विपरार्द्धे तु ब्रह्मण आयुषि सप्त प्रकृतयः महदहंकारपञ्चतन्मात्राणि ५ संघातो महदादिकार्यं सृजतः प्रकृतौ लीनतत्कार्यस्य ब्रह्माण्डस्य च प्रलयात् प्राकृतिक इत्यर्थः विघाते विघातकारणे उपसादिते सति ६ तदेवाह पर्जन्य इत्यादिना वृष्टोऽक्रिया

द्विपरार्द्धेत्यर्थः प्राकृतेनयं येन ७ सामुद्रादिकं सर्वं संरविः पिबते आकर्षति ८

भा॰
टी॰
११

अनिलवेगोत्थः वायुवेगोद्धतः अनिलवेगो वा इति पाठे अनिलेन वेगो यस्यः वा रविणा रश्मिभिः
पीतमुदकं च दहतीत्यर्थः अनिलवेगो वा इति तु पाठः सुगमः भूविवरान्पातालादीन् प्राप्यतान् र
विणा दैहिकारस्यकर्षणात्प्राणरहितान् ९ शिखाभिः ज्वालाभिः किंचिदधिकं वर्षाणां शतं सं

ततः संवर्तको वह्निः संकर्षणमुखोत्थितः दहत्यनिलवेगोत्थः शून्यान्भूविवरानथ
९ उपर्यधः समन्ताच्च शिखाभिर्वह्निसूर्ययोः दह्यमानं विभात्यण्डं दग्धगोमयपिण्डवत्
१० ततः प्रचण्डपवनो वर्षाणामधिकं शतं परः संवर्तको वाति धूम्रं
खं रजसावृतं ११ ततो मेघकुलान्यङ्ग चित्रवर्णान्यनेक
शः शतं वर्षाणि वर्षन्ति नदन्ति रभसस्वनैः १२ त
त एकोदकं विश्वं ब्रह्माण्डविवरान्तरं १३ तदा
स्वमेवं यं समन्तात्संन्याप उदप्लवे ग्रस्तोपयाति पृथिवी प्रलयत्वाय कल्पते १४

वर्तकः परो वायुर्वाति तदा रजसावृतं खं धूम्रं भवति ११ रभसस्वनैः तीव्रगर्जितैः १२ ब्रह्माण्ड
विवरान्तरं ब्रह्माण्डविवरमध्यगतं विश्वं एकोदकं एकार्णवोदकं व्याप्तं भवति १३ उदप्लवे ॥
उदकेनाप्लाविते सति प्रलयत्वाय अभावाय १४ ॥

भूतादिस्तामसोऽहंकारः गुणोर्वृत्तिभिःसह १७ अव्याकृतं प्रधानं १८ तस्यात्तलयो नास्तीत्याह ततस्ते
ति कालावयवैः अहोरात्रादिभिः गुणभावविकारः परिणामः विपरिणामः अव्यक्तमक्षितत्वविका
रशून्यं नित्यं सर्वदेवरूपं बुद्धिरहितेऽप्यर्थः अव्ययं अपदाप शून्यं सर्वहेतुः कारणमिति १९ किंचवा

अयं रसमप्सो तेन ततालीयंते ज्योतीरसाः ग्रसतेतेन सोरूपं च पुनस्तद्भिन्नदा १५ लीयते वा
निले तेजोवायो खं ग्रसते समं सर्वे विपातिं वितानेल तत्र नभसो गुणा १६ शब्दं ग्रसति भू
तादिर्नभस्तस्मिन्लीयते तैजसश्चेन्द्रियाणि गादेवान्वैकारिको गुणो १७ महानग्रसत्यहं
कारं गुणसत्वाख्यश्च ते ग्रसते व्याकृतं राजन्ना गणकारलेन चोदितं १८ ततस्य काला
वयवैपरिणामाद्यो गुणाः अनाद्यनन्तमव्यक्तं नित्यकारणमव्ययं १९ नयत्र वाचो न
मनो न सत्त्वतमो रजो वा महदादयो मी नप्राणबुद्धीन्द्रियदेवता वा नसन्निवेशः खलु लो
ककल्पः २० नस्वप्नजागृन्नच तत्सुषुप्तं नखं जलं भूरनिलोग्निरर्कः संसुप्तवच्छून्यवद
प्रतर्क्यं तन्मूलभूतं पदमामनन्ति २१ लयः प्राकृतिको ह्येष पुरुषाव्यक्तयोर्यदा शक्तयः
संप्रलीयन्ते विवशाः कालविद्रुताः २२ ॥
ता

गादिगोचरस्य सविशेषस्य विकाराभवंति रुद्रं ततत्वेत्याह नयत्रेति द्वाभ्यां लोककल्पः कोक
रूपः सन्निवेशः गोचराणाविशेषः २० स्वप्नजाग्रत्सुप्तजागरणावस्थायुतं सुषुप्तवत्तत्रेंद्रियाद्यभावात्
शून्यस्याहशून्येहेतुः अप्रतर्क्यं तत्पुनः शून्यं सर्वेत्याह नहीति २१ उपसंहरति लयइति शक्तयः

भा
द्वा
१२

आत्यंतिकलयमाह बुद्धीन्द्रियेति द्वादशभिः आत्यंतिकलयो मोक्षः सच ब्रह्मज्ञानेन सर्वप्रपंचल
यात्मकः नच प्रपंचस्यात्मवत्सत्यत्वे लयः संभवतीति ज्ञानरूपाद्ब्रह्मणः पृथग्भूतस्यासत्त्वं प्रतिपा।
दयति बुद्धिश्चेन्द्रियाणि चार्थाश्चेति तेषां रूपेण ग्राहकग्राह्यरूपेण तेषामाश्रयं ज्ञानमेव भाति
नपृथक् तत्र हेतुमाह दृश्यत्वाव्यतिरेकाभ्यामिति अतो यदाद्यन्तवत्तदवस्तु अत्रैव प्रयोगः विम
तं सन्न भवति दृश्यत्वात् कारणाव्यतिरेकात् आद्यन्तवत्त्वाच्च रज्जुसर्पादिवदिति २३ तत्राव्यतिरेके दृष्टा।
न्तेन प्रपंचयति दीप इति दीपस्तद्रूपाणि तेजोविशेषाणां यथा तेजसो न व्यतिरेकाः तथा धीः कर्त्री।
खानि करणानि मात्रा विषयाः ऋताद्ब्रह्मणः पृथक् न सर्वस्य ब्रह्मकार्यत्वात् नन्वेवं कार्यकारणयोर्भे

ति बुद्धीन्द्रियार्थरूपेण ज्ञानं भाति तदाश्रयं दृश्यत्वाव्यतिरेकाभ्यामाद्यन्तवदवस्तु यत् २३ दीप
श्चक्षुश्च रूपं च ज्योतिषो न पृथग्भवेत् एवं धीः खानि मात्राश्च न स्युरन्यतमादृतात् २४ बुद्धेर्जाग
रणं स्वप्नः सुषुप्तिरिति चोच्यते मायामात्रमिदं राजन् नानात्वं प्रत्यगात्मनि २५ यथा जलधरा
व्योम्नि भवन्ति न भवन्ति च ब्रह्मणीदं तथा विश्वमवयव्युदयाप्ययात् २६ ॥

भेदे कार्यस्य सत्त्वं कारणस्याप्यसत्त्वं प्रसज्येत तत्राह अन्यतमादृतादिति कार्यादन्यत्वेन व्यतिरिक्ताद्ब्रह्मणः
प्रपंचाद्ब्रह्मणोस्ति व्यतिरेकः प्रपंचस्य तु ततो नास्ति व्यतिरेक इत्यर्थः २४ यदा तु बुद्धेरसत्त्वं तदा तत्त्व
स्थानां सत्त्वादीनामसत्त्वमित्याशयेनाह बुद्धेरिति ननु विश्वतैजसप्राज्ञानामेतान्यवस्थानत्वं बुद्धेरित्या
शंक्याह मायामात्रमिति इदं विश्वतैजसप्राज्ञरूपं २५ आद्यन्तवत्त्वादित्यस्य हेतोरसिद्धिमाशंक्य सा
वयवत्वेन साधयति यथेति अवयवीति यस्मात् सावयवं तदाद्यन्तवत् घटादिवदित्यर्थः अत उदयाप्य
यात् आद्यन्तवत्त्वाद्धि असत्त्वं भवतीत्यर्थः यद्वा पृथग्योगमायायित्वाद्विश्वमिथ्यात्वं सत्त्वं न वेदं

[illegible] २५

अन्यत्तमाहत्वादिति प्रतिज्ञातं कारणस्य सत्यत्वमुपपादयति सत्यं हीति अवयवःकारणं प्राकृः वाचारं
भणं विकारो नामधेयं सत्ति के त्येव सत्यमित्यादि श्रुतिभिः अत्र युक्तिमपि दर्शयति विनेति अंगाहेरात
न हि यस्मादर्थेन अवयवविना पृथगेवावयवाः प्रतीयेरन् यथा पटस्यावयवाः तंतवः पटात्पृथक्प्र
तीयंते न तद्वदिति १२ ननु कार्याभावे कारणानेकस्मात्ःज्ञानोद्घटेन सत्यं तद्विनातीव सत्यमित्याह
यदिति सामान्यं कारणं विशेषःकार्यं तद्रूपेणान्योन्याश्रयात्परस्परापेक्षत्वेन निरूपणसहत्वा
दित्यर्थः अतःकारणत्वमवधित्वं व्यापकत्वमित्यादिकमपि परस्परापेक्षत्वादाद्यंतवत्सर्वमवस्त्वित्यर्थः
यद्वा तत्तैव हेत्वंतरमेतत् यदुपलभ्येत सद्भ्रमः सामान्यविशेषरूपत्वात्संभवेत् अन्योन्याश्रयादि

सत्यं स्यादवयवःप्रोक्तःसर्वावयविनामिह विनार्थेन प्रतीयेरन्पटस्येवांशतंतवः १३ यत्सामान्य
विशेषाभ्यामुपलभ्येत सद्भ्रमः अन्योन्यापाश्रयात्सर्वमाद्यंतवदवस्तु यत् १४ विकारःख्या
यमानोपि प्रत्यगात्मानमंतरा न निरूप्योस्त्यणुरपि स्याच्चेच्चित्सम आत्मवत् १५

नीदमपि हेत्वंतरं सामान्यतो विशेषश्च व्याप्यव्यापकत्वादिरूपेण परस्पराधीनसिद्धित्वात्तथाभूतस्य भा
वदिति निगमनं अतो यदाद्यंतवत्तत्सर्वमवस्त्विति १४ तदेवं मनो नैवेहेत्यभिप्रपंचस्यासत्वं प्रसा
धितं तत्र शंका ननु प्रपंचस्यापि प्रकाशमानत्वादात्मवत् सत्वं किं न स्यादिति तत्राह विकार
इति ख्यायमानःप्रकाशमानोपि विकारःप्रपंचःप्रत्यगात्मप्रकाशं विना अणुमात्रोपि वा न निरूप्योस्ति
तेन विनाऽनिरूप्यःस्याच्चेत्तर्हि सोपि चित्समःस्याच्चिद्रूपेणात्मनःसमः स्वप्रकाशो भवेत् तथाच
सति सोप्यात्मवत्स्यात् एकरूपःस्यादित्यर्थः १५ ॥

भा०
स्क०
११

कृतत्वात्तत्राह नहीति नन्वस्यास्यात्मनो जीवब्रह्मस्वरूपं नानात्वमस्त्येव तत्राह यद्येवं नानात्वं
मन्यते तर्हि विद्वान् कथं तर्हि तयोर्भेदव्यवहारः उपाधिकृतत्वादाह नानात्वमिति तत्र छिद्रयो
र्घटाकाशमहाकाशयोरिवेति परिच्छेदो दृष्टान्तः ज्योतिषोः प्रकाशात्मकस्य सूर्ययोरिवेति उपा
धिकृतविकारसदृशज्ञानेनानयोर्जलप्रतिबिम्बकाशयोरिवेति क्रियाभेदः १८ ब्रह्मण एव प्रपंच
व्यवहारालंबनत्वं दृष्टान्तेन स्पष्टयति यथेति क्रियाभिस्तत्तत्सूचनाभेदैर्बहुधा कटककुंडलादि
रूपेण लौकिकवैदिकैर्वचोभिर्जनैः अहंकारोपहितैः १९ नन्वहंकारस्य कथं ब्रह्मस्वरूपावर

नहि तस्य स्यान्नानात्वमविद्वान्यदि मन्यते नानात्वं छिद्रयोर्यद्वज्ज्योतिषोर्वातयोरिव १८
यथा हिरण्यं बहुधा समीहते नृभिः क्रियाभिर्व्यवहारवर्त्मसु एवं वचोभिर्भगवानधोक्ष
जो व्याख्यायते लौकिकवैदिकैर्जनैः १९ यथा घनोर्कप्रभवोर्कदर्शितो ह्यर्कांशभूत
स्य च चक्षुषस्तमः एवं त्वहं ब्रह्मगुणस्तदीक्षितो ब्रह्मांशकस्यात्मन आत्मबंधनः २०

णेन भेदव्यवहारभक्तेन तेन ब्रह्मकारणभूतत्रयस्यावारकत्वासंभवात् आवरणे वा स्यापि प्रकाश्य
भवादित्याशंक्य सदृष्टान्तमाह यथेति अर्करूपप्रभव एव मेघरूपेण परिणतो वर्षति अग्नेः प्रास्ताहु
तिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इत्यादिवचनात् तस्मादर्क
प्रभवः अर्केणैव दर्शितः अर्कांशस्य चक्षुषस्तमः स्वरूपभजनार्कदर्शनप्रतिबंधको भवति अहंत्व
हंकारः ब्रह्मगुणः ब्रह्मकार्यभूतः तदीक्षितः तेनैव प्रकाशितश्च आत्मनो जीवस्य आत्मरूप

३२ ॥

नः ब्रह्मस्वरूपदर्शनप्रतिबंधको भवति

अतएवाहंकारतापोस्वरूपदर्पणंभवतीतितेनैवदृष्टांतेनाह घनइति आत्मनउपाधिर्जितात्मया
विचारेणततद्धितत्वात्मसमरोत्त् पाकृवृत्साहमितिपश्यतीत्यर्थः १३ सोयमात्मेतिकः प्रलयवृत्तस्यंस
हरितिसरैवमिति विवेकहेतिनाज्ञानपाषेणाहंकारणमेवात्मबंधनेच्युतेपरिशुद्धात्मात्मनस्मा
नभवतीतितथा १४ नित्यप्रलयमाह नित्यदेति १५ क्रतत्यतमाह कालेति परिणामिनोनदी
प्रवाहप्रदीपज्वालादीनांयाउत्पत्तीचावस्थाः ताःजन्मरूपस्रोतसोवेगेनाप्रह्रियमाणस्यदेहादेर्हेयप

घनोयदार्कप्रभवोविदीर्यतेचक्षुःस्वरूपंरविमीक्षतेतदा यदाह्यहंकारउपाधिरात्मनोजिज्ञासया
नश्यतितर्ह्यनुस्मरेत् १३ यदैवमेतेनविवेकहेतिनामायामयाहंकरणात्मबंधनं छित्त्वाच्यु
तात्मानुभवोवतिष्ठतेतमाहुरात्यंतिकमंगसंप्लवं १४ नित्यदासर्वभूतानांब्रह्मादीनांपरंतप उ
त्पत्तिप्रलयावेकेसूक्ष्मज्ञाःसंप्रचक्षते १५ कालस्रोतोजवेनाशुह्रियमाणस्यनित्यदापरिणामिना
मवस्थास्ताजन्मप्रलयहेतवः १६ अनाद्यंतवतानेनकालेनेश्वरमूर्तिना अवस्थानैवदृश्यं
तेवियतिज्योतिषामिव १७ ॥

मानानतद्देवनित्यदाजन्मप्रलयहेतवोभवंतीति १६ देहः प्रतिक्षणंप्रध्वंसीप्रतिक्षणमवस्थाभेदस्य
विद्यमानत्वात्प्रदीपादिवदित्यनुमानेयद्यपिप्रतिक्षणमवस्थाभवेतितर्हि किंनदृश्यंते अतोहेतुरसि
द्धइत्याशंक्याह अनाद्यंतवताकालेनजायमानाअवस्थानैवलक्ष्यंते आकाशेगच्छतांज्योतिषांचं
द्रादीनांगमनागमनावस्थाविशेषाइवयथानैवलक्ष्यंतेतद्वत् अतोयथातेषांप्रदेशांतरप्राप्त्याप्रति
क्षणावस्थाः कल्प्यंतेतद्वदत्रापिदावप्रदीपादिदृष्टांतेनमध्यवर्तिन्योवस्थाः कल्प्यंतइतिभावः

भा० उपसंहरति निस्यूतेति ३८ पुराणार्थमुपसंहरति एतावता इति लीलाविषयाः कथाः अन्योन्यस्यापि
द्वा० कार्त्स्न्येनाभिधाने नेशः ३८ तत्त्वपरिमाकल्लोनाभिधानं तत्प्रमाणे तर्हि किं तदभिधानेन तत्राह सं
४१ सारेति विविधदुःखमेव दवो दावानलस्तेनार्दितस्य पीडितस्य अनंत इति तीर्षोः पुंसः भगवतो या
लीलास्तासां कथाः तासां रसस्तन्निषेवणमंतरेणान्यः प्लवः उत्तरणसाधनं न भवेत् उपायांतराणां प्र

[illegible] तिबंधे निमित्तकर्मत्वेन तथा प्राकृतिकोलयः आत्यंतिकश्च कथितः कालस्य गतिरीह
शी ३८ एताः कृष्णस्य पुरुषावतारस्य नारायणस्याखिलसत्त्वधाम्नः लीलाकथाश्च कथि
ताः समासतः कार्त्स्न्येन तस्तां ज्योप्यभिधातुमीशः ३९ संसारसिंधुमतिदुस्तरमुत्तितीर्षोर्नान्य
प्लवो भगवतः पुरुषोत्तमस्य लीलाकथारसनिषेवणमंतरेण पुंसो भवेद्विविधदुःखदवा
र्दितस्य ४० पुराणसंहितामेतामृषिर्नारायणोऽव्ययः नारदाय पुरा प्राह कृष्णद्वैपाय
नाय सः ४१ स वै मह्यं महाराज भगवान्बादरायणः इमां भागवतीं प्रीतः संहितां वेदसंमि
ताम् ४२ इमां वक्ष्यत्यसौ सूत ऋषिभ्यो नैमिषालये दीर्घसत्रे कुरुश्रेष्ठ संपृष्टः शौनकादिभिः

वाक्यार्थस्तु नामेव यथा यथावत् निषेवणमित्यर्थः ३९ श्रोतृवक्तृपरंपरां संप्रदायप्रतिमाह पुरा संख्या:
णसंहितामिति त्रिभिः ४० स वै बादरायणः सन्मह्यमिति मां संहितां प्राहेति पूर्वेणान्वयः ४१
असौ सूत इति पृष्टः स्थितमेव सूत्रः निर्दिशन्नाह मिनैमिषालये मिषारण्यस्थाने ४२ इति ॥ ४१
श्रीभावार्थदी० द्वादशस्कंधे चतुर्थोध्यायः ४ ॥

पंचमेतत्समासेन परं ब्रह्मोपदेशतः पाठमात्रसंदेशात्स्मृताभीतिनिवारणं एतत्पुराणं श्रवणं च भ
यं प्राप्नोति त्वमपि श्रीमत्पुराणार्थं मनसा स्मारयेति अत्रेति अयं भावः नानाः कर्तारो ऽस्मा पिपयस्य प्रसा
दतः प्रसादोत्तरं जो वृत्तिहर्षः ततो ज्ञानतानं तत्परं तंत्रः सर्वं संहतो हृदस्य यस्य क्रोधसंभवेन तत्तु स्वतं
त्रः सविषस्य स्यात्स्यान्निर्धनाभगवानतानवर्ण्यते अत एवं मत्तं भगवतेऽसृष्टं एवतः ऊतो न्यस्माद्यथाक
ति १ ते पुनः कृतार्थं एवं तन्मनसा स्मारयति ततितित पश्य बुद्धिमविवेकं यस्मात्तनं त्यामि ऊत्तरत्यत
स्माह नतानतूति यथादेहः प्राग्भूतपूर्वाद्यतानोनत्यातिवनचेवेतत्पूर्वेनाभमेवाद्यतानोसि

श्री क वाच अत्रानुवर्ण्यते भीष्मं विष्णास्याभगवान्हरिः यस्य प्रसादतो ब्रह्मा रुद्रः क्रो
धसमुद्भवः १ तं तपञ्जन्मसिद्ध्यै तिपश्य हि मिमं जहि ततातः प्राग्भूतोद्य देहवंतं न नं त्व
त्वा। सि २ नमविष्णसिभूतं पुत्ररूपो ऽत्रादिरूपवान वीजांकुरवद्देहाद्देहांतरितोयथानलः ३

१ ननु वीजांकुरवत्तस्मात्पुत्ररूपेणाभयमेवमेति यथाहश्रुतिः अंगादंगात्संभवसि हृदयादभि
जायसे आत्मा वै पुत्रनामासि स जीव शरदः शतमिति ततः पुनरंकुरात्तत्सवीत्ररूपेण
पिमयमेव भवति पिता पुत्रेण पितृमान्योनियोना वितिश्रुतः अतस्तेषु न शून्यकारणं तत्त्वमसी
ति वेदवाक्यं न मविष्णसीति भूतापुत्ररूपो ऽत्रादिरूपवान्वीजांकुरवन्नमविष्णसि यस्माद्देहाद्देहांतरि
रितं त्वं यथानलः काष्ठाद्देहाद्देहांतराधानोत्तामेतिभावः ३ ॥

भा० द्वा० ५५ जन्मादीनां देहधर्मत्वं दृष्टान्तेन प्रपंचयति स्वप्नेयथात्मनः स्विच्छिरश्छेदं स्वयं पश्यति एवं जागरतोपि यस्माद्देहस्य पंचत्वादिकं पश्यति न तत्सत्यदेवात्मनेः इदं भ्रममात्रं वस्तुतस्त्वात्माजोमरश्चेत्यर्थः तदुक्तं आत्मनः पितृपुत्राभ्यां सनमेयोर्भवाप्ययौ न भवाप्ययवस्तूनामभिज्ञो द्वयलक्षणं इत्यादि ४ यस्माद्देहोपाधिकोयमात्मनो जन्मादिसंसारभ्रमः तस्मादुपाधिनिवृत्तौ मुच्यते इति सदृष्टान्तमाह घटइति यथाघटाद्युपाधेः पूर्वमिव पुनर्घटे भिन्ने तत्संबद्धावकाश आकाश एव स्याद्यथा एवं देहसृजेन नष्टानेन लीनेपि इति ५ ज्ञानेनलयं संभावयितुं मायाकृतमात्मनो देहाद्युपाधि

स्वप्नेयथापि स्विरश्छेदं पंचत्वाद्यात्मनः स्वयं । यस्मात्पश्यति देहस्य तत आत्मा ह्यजोमरः ४
घटे भिन्ने यथाकाश आकाशः स्याद्यथापुरा । एवं देहे मृते जीवो ब्रह्म संपद्यते पुनः ५ मनः
सृजति वै देहान्गुणान्कर्माणि चात्मनः । तन्मनः सृजते माया ततो जीवस्य संसृतिः ६ स्ने
हाधिष्ठानवर्त्यग्निसंयोगो यावदीयते । ततो दीपस्य दीपत्वमेवं देहकृतो भवः । रजःसत्त्वतमोवृत्त्या जा
दीपस्य ४ यतेथ विनश्यति ७ न तत्रात्मा स्वयंज्योतिर्यो व्यक्ताव्यक्तयोः परः । आकाश इव चाधारो ध्रुवो नंतोपमस्ततः ८

[illegible]

संक्षेपप्रकारमाह मनइति मनस्त्वात्मनो देहादीन्सृजति तच्च मनो माया सृजति ततो मायाद्युपाधिसमुदायात् ६ एतदेव सदृष्टान्तमाह सार्धेन स्नेहेति दीपस्य ज्योतिषः दीपत्वं ज्वालारूपः परिणामः तत्र तैलस्थानीयं कर्म तदधिष्ठानस्थानीयं मनः वर्तिस्थानीयो देहः अग्निसंयोगस्थानीयश्चैतन्याध्यासः दीपत्वस्थानीयः संसार इति योजना देहकृतः देहनिबंधनः यद्वा देहकृतो मानसो नचात्मनः ७ अतो दीपवन्नाशं सारूप्यं वा न प्राप्नोतीत्यात्मा ज्योतिर्वेत्याह नेति न तत्र प्रतीय

अतस्त्वमेवंचिंतयेत्याह एवमिति आत्मस्थंदेहाद्युपाधिस्थितं आत्मरूपाविचारयअनुमानगर्भि
ण्याद्रष्टृदृश्यान्वयव्यतिरेकयुक्त्या ९ एवंचसतित्वांतक्षकोनदहेदित्याह चोदितइति तत्रहे
तवःमृत्यवइतिमृत्युहेतवः १० विमर्शप्रकारंदर्शयन् तत्फलंदर्शयतिद्वाभ्यां योहंसब्र
ह्मैव यद्ब्रह्मतदहमेवेतिसमीक्षन् तत्राहंब्रह्मेतिभावनयाजीवस्यकोपाधिनिवृत्तिः ब्रह्माहमि

एवमात्मानमात्मस्थमात्मनैवामलप्रभो बुद्ध्यानुमानगर्भिण्यावासुदेवानुचिंतया ९ चो
दितोविप्रवाक्येननत्वांधक्ष्यतितक्षकः मृत्यवोनोपधक्ष्यंतिमृत्यूनांमृत्युमीश्वरं १० अहंब्र
ह्मपरंधामब्रह्माहंपरमंपदं एवंसमीक्ष्यन्नात्मानमात्मन्याधायनिष्कले ११ दशंतंतक्ष
कंपादेलेलिहानंविषाननैः नद्रक्ष्यसिशरीरंचविश्वंचपृथगात्मनः १२ एतत्तेकथितंता
तयथापृष्टवान्नृप हरेर्विश्वात्मनश्चेष्टांकिंभूयःश्रोतुमिच्छसि १३ इतिश्रीभागवते
महापुराणेद्वादशस्कंधेपंचमोध्यायः ५

भावनयाब्रह्मणःपरोक्ष्यनिवृत्तिर्भवतीतिमाविहारोदर्शितः निष्कलेनिरुपाधौआत्मनिब्र
ह्मणि ११ विषयुक्तैराननैर्दशंतंग्रसंतंतक्षकंलेलिहानंसर्पं यद्वा लेलिहानंजिह्वाभिरोष्ठ
प्रांतंसंलिहंतंसाक्षाद्दशंतंआत्मनःपृथक् १२ हरेश्चेष्टामात्मनयत्पृष्टवानतदेततेकथि
तंशिष्यस्यकृतार्थतापरीक्षणायपृच्छति किमिति १३ इतिद्वादशस्कंधेपंचमोध्यायः ५

भा॰ द्वा॰ ६

षष्ठे परीक्षितो मोक्षः सर्पहोमादिकं ततः । वेदशाखाविभागोक्तो विस्तरेण व्यासवर्णनं १ एत
त्पुराणं निशम्य निखिलात्मा हरिः सर्वं पश्यति निखिलं वा आत्मनि पश्यतीति निखिलात्मदृक् तेन अतः समेन तेन त
अवनतेन मूर्ध्ना बद्धाञ्जलिः तत्पादमूलमुपसृत्य तं प्रणम्य इदमाह विष्णुरातः १ सिद्धः कृतार्थोऽस्मि यतः अ
नुगृहीतोऽस्मि अनुग्रहमेवाह यद्यस्मात् श्रावितः च पुनः साक्षात्साधनेन च २ करुणात्मनाम
नेदमतिदृष्टान्तमिति ३ अश्रौष्म श्रुतवन्तः भवतः सकाशात् ४ सिद्धोऽस्मीत्युक्तं तदेवावि

सूत उवाच एतन्निशम्य मुनिनाभिहितं परीक्षिद्व्यासात्मजेन निखिलात्मदृशा समेन तत्पाद
पद्ममुपसृत्य नतेन मूर्ध्ना बद्धाञ्जलिस्तमिदमाह स विष्णुरातः १ रा उवाच सिद्धोऽस्म्यनुगृहीतोऽस्मि भ
वता करुणात्मना श्रावितो यच्च मे साक्षादनादिनिधनो हरिः २ नात्यद्भुतमहं मन्ये महतामच्यु
तात्मनां अज्ञेषु तापतप्तेषु भूतेषु यदनुग्रहः ३ पुराणसंहितामेतामश्रौष्म भवतो वयं यस्यां
खलूत्तमश्लोको भगवाननवर्ण्यते ४ भगवंस्तक्षकादिभ्यो मृत्युभ्यो न बिभेम्यहं प्रविष्टो ब्रह्म
निर्वाणमभयं दर्शितं त्वया ५ अनुजानीहि मां ब्रह्मन् वाचं यच्छाम्यधोक्षजे मुक्तकामाशयं चेतः प्र
तावत्कुक्षौ वै अश्वसितेन मार्कण्डः सोऽन्तः प्रविश्य कोषणाविशत् तत्राप्यदो न्यस्तमचष्ट कृ
त्स्नशो यथा पुरामुह्यत्तीव विस्मितः २७ विरोद्भिमरणान्द्वितानन्दीपान्सवर्षान्ककुभः
सुरासुरान् वनानि देशान्सरितः पुराकरान्खेटान्व्रजानाश्रमवर्णवृत्तयः २८ महान्ति भूता
न्यथ भौतिकान्यसौ कालं च नानायुगकल्पनं यत्किंचिदन्यद्व्यवहारकारणं ददर्श विश्वं स
दिवावभासितं २९ हिमालयं पुष्पवहां च तां नदीं निजाश्रमं यत्र ऋषीन्नपश्यत विश्वं वि
पश्यञ्छ्वसिताच्छिशोर्वै बहिर्निरस्तो न्यपतल्लयाब्धौ ३० तस्मिन्पृथिव्याः ककुदि प्ररूढं
वटं च तत्पर्णपुटे शयानं तोकं च तत्प्रेमसुधास्मितेन निरीक्षितोऽपाङ्गनिरीक्षणेन ३१ अथ
तं बालकं वीक्ष्य नेत्राभ्यां धिष्ठितं हृदि अभ्ययादतिसंक्लिष्टः परिष्वक्तुमधोक्षजम् ३२

यातेक्षते च दिव परमार्थ रवेस्वव भासितं तेनैव २९ वटं च तत्कं वीक्ष्य ततः प्रेमसुधास्मि
तयुक्तं नापांगनिरीक्षणेन निरीक्षितः सन् ३१ अथ तं बालकमधोक्षजं परिष्वक्तुमभ्ययादिति
हृदयोरस्त्वस्य कथं भूतं नेत्राभ्यां हृदि धिष्ठितम् ३२ ॥

भा०
द्वा०
१४

तावत्स ऋषिर्दृग्गतात्मा भगवान्पूर्वमेव ऋषेस्तत्क्षणात्तिरोहितोऽभूत् तत्र यथा मनोरथकल्पवेदृष्टाः अनीशेनो निर्मितैः ते
न निर्मिता नार्यो(?) ... इति ३३ तमन्वन्तर्हितं भगवंतमनुवटः सलिलं लोकसंप्लवश्च तिरोधायि अं-
तर्हितः स च स्वाश्रमे एव यथापूर्वं स्थित इति ३४ इति द्वादशे नवमः ९॥ दशमे शिववराप्त्या मुनेस्त-
पोवरानदात् तेन साकं मुनिं प्रीत्या समाभाष्य समानयत् १ ज्ञानकाशया ज्ञानवत्सु प्रकाशमानया

तावत्स भगवान्साक्षाद्योगाधीशो गुहाशयः । अन्तर्दध ऋषेः सद्यो यथेहानीशनिर्मिता ३३
तमन्वथ वटो ब्रह्मन्सलिलं लोकसंप्लवः । तिरोधायि क्षणादस्य स्वाश्रमे पूर्ववत्स्थितः ३४
इति श्रीभागवते द्वादशे नवमः ९॥ सूत उवाच॥ स एवमनुभूयेदं नारायणविनिर्मितं । वैभ-
वं योगमायायास्तमेव शरणं ययौ १ मार्कंडेय उवाच॥ प्रपन्नोस्म्यङ्घ्रिमूलं ते प्रपन्नाभयदं हरे ।
यन्माययापि विबुधा मुह्यन्ति ज्ञानकाशया २ सूत उवाच॥ तमेवं निभृतात्मानं वृषेण दिवि पर्यटन् ।
रुद्राण्या भगवान्रुद्रो ददर्श स्वगणैर्वृतः ३ अथोमा तमृषिं वीक्ष्य गिरिशं समभाषत ।
पश्येमं भगवन्विप्रं निभृतात्मेन्द्रियाशयम् ४ निभृतोदझषव्रातो वातापाये यथार्णवः ।
कुर्वस्य तपसः साक्षात्संसिद्धिं सिद्धिदो भवान् ५

तद्दर्शनं विना विद्वांसोऽपि यस्य तव मायया ज्ञाननिलोपमित्यहं कारोणमस्यतीत्यर्थः २ श्रीनारा-
यणेन एवं स्वमायाटोपं दर्शितस्य तत श्रीशिवरूपेण सांत्वयामास तदाहुतमेवमित्यादिना निभृतात्मानं
समाहितचित्तं रुद्राण्या भवान्या ३ निभृतात्मा निश्चलात्मा इन्द्रियाशयः देहेन्द्रियमनांसि यस्य तं
निभृतं निश्चलमुदकं झषव्रातश्च यस्मिन्सः संसिद्धिं फलं साक्षात्कुरु प्रकटीकुरु यतो भवान् सिद्धिदः ५

आशिषः अभ्युदयलक्षणाः इत्तसिद्ध्यर्थहेतुभक्तिमिति ६ संवदिष्यामः संवादं करिष्यामः ७ सा
क्षतांगतिर्विहेतुः ईश्वानाप्ति ८ हृष्टाधियोक्तः कारणस्य हृतयोयेनसः ९ १० नकेवलं व हि देव आ

श्री ग ल च नैवेद्यकृत्वाशिषः कापित्वस्यर्षिर्मोक्षमण्डप भक्तिं प्रणमाव तिलत्वमवा
नुहृष्ठेमये ६ अथापि संवदिष्यामो भवान्येतेन साधुना अयंहि परमो लाभोनन्दणं साधुस
मागमः ७ सू इ च इत्युक्त्वातमथैपाय भगवान्साक्षतांगतिः ईश्वानः सर्वविद्यानामीश्व
रः सर्वदेहिनां ८ तयोरागमनं स्वाताटीपायोर्जगाद्दम्मत्योः नवेदहृद्दधीहृतिरास्मान्नं विश्व
मेवच ९ भगवांस्तद्दृश्रित्वाय गिरिशो योगमायया अविशत्तदहाकाशं ब्रापुच्छिद्रमिवे
श्वरः १० आत्मन्यपि शिवं प्राप्तं तडित्तिं गजटापरं अद्वैतं प्रभञ्जं प्रांशुमर्धचन्द्रविभास्क
रं ११ व्याघ्रचर्माम्बरं शूलधनरिवसितवर्मभिः अक्षमालाङ्गमहल्लकपालधरं सुखह १२
विभ्राणं सहसा भान्तं विवस्वद्धृदि विस्मितः १३

अन्यापि प्राप्तं शिवं चित्तस्त विस्मितः कथं प्राप्तं सहसा अकस्मादेव हृदि भातं कथं सन्तं न उद्दत्तिं शो
ज्ञानसाक्षाद्यतीतितत्पातं ज्योत्स्नापदीपिरपसनभू ११ शूलादिभिः सहाक्षमालादीन विभ्राणम् सि
त्वन्वयः अक्षमालादीनां द्वंद्वैक्यम १२

भा॰ विस्मयपूर्वकं वहिर्दृष्टपूर्वमाह किमिदमिति सोमयागस्यमहायागस्ते हृद्रेदृष्टपूर्वो ८ ततोनन्ताम ७
टी॰ पूर्णकामं त्वमनन्त किं येन त्वया तत्रान्निर्वृत्तं भवतीति १५ निर्गुणत्वेन त्रिगुणत्वेन च सूक्ष्मोसि नमः शि
१५ वाय निर्गुणाय सगुणाय विष्णवे अनन्त एवमसृयतीति तत्पा तस्मै ८ तोष्टतः त्रयः त्रस्य विस्मय महेश्वराः य

किमिदं कृत एवेति समाधेर्विरतो मुनिः तेत्रैकमीलत्पदर्दृष्टो महागणो होमयागस्ते ८ हृद्रे त्रिलोके
कारहं त्वामपि स्मारमुनिः तस्मै सपर्यो त्वा दृष्टा स्मारणाय महोमया ७ स्मरणतास्मनपाया
र्वगणपस्त्रस्त्रूपदीपकैः आरात्मानभावेन पूर्णकामस्य तेविभो कर्त्वास किमीशानयेनेदं।
निर्वृत्तं जगत १५ नमः शिवाय शान्ताय सत्वाय प्रमृडाय च रजोजुषेथ घोराय नमस्तुभ्यं तमोजु
षे ५ ॥सूतउ॥ एवं स्तुतः स भगवानादिदेवः सतां गतिः परितुष्टः प्रसन्नात्मा प्रहस्य तमभाष
त ए श्रीभगवान् वरं वृणीष्व नः कामं वरदेशा वयं त्रयः अमोघं दर्शनं येषां मर्त्यो यद्विंदते
तेमृतं ९ ब्राह्मणाः साधवः शान्ता निःसंगा भूतवत्सलाः एकान्तभक्ता अस्मासु निर्वैराः स
मदर्शिनः १९ सलोका लोकपालास्तान्वंदंत्यर्चयुपासते अहं च भगवान्ब्रह्मा स्वयं च हरिरी श्वरः

नयेभ्यः तेवयं १५ वरदानादिना भवत्सेवैवास्माभिः क्रियतेनेन तनुग्रहः जगदुद्धयत्नाज्ञवत्तामिति
ब्राह्मणांसेवोति ब्राह्मणास्त्यादिनायेसाधवः सदाचाराः शान्ताः मत्सरादिरहिताः निःसंगाः
निष्कामाः १९ नकेवलंतएव किंच अहं चेत्यादिनः २ ॥

पूज्यतमत्वे हेतुं तदमाह नेति अन्यदेवापि श्रवणमात्रमपि च वहेनपश्यंति तत्तत्स्मात् एवं भक्तान् गुणातीत मा-
हिमत्तेन ११ श्रवणलोभः श्रवणप्राण आत्मसमाधानं चिंतैकाग्र्यं तपः आलोचनं स्वाध्यायः सर्वलोकादिष्ट
नेमियमः १२ वागादिनियमास्ते १३ किंच श्रवणादित्यादि १४ चेद्गोलल्लामोपेभवणोयस्यतस्य

ननु मम च्युतेनैवाभिधानमात्रेण पिब स्वते नात्मनश्च जनस्यापि न ययुक्तं त्वयमीमहि ११ नन्व
स्यानितीर्थानितदेवाश्च नतनोद्भुतास्तेषु नैत्यग्रहकालेन पूर्यंदर्शनमात्रतः १२ श्रवणलोभोनम
स्यामोयस्मृहृद्येत्रयोमयम विदंत्यात्मसमाधानेन तपः स्वाध्यायसंयमैः १३ श्रवणादर्शनाद्वापि
महापातकिनोपि वः शुद्धेरन्नंत्यजाश्चापि किमुसंभाषणादिभिः १४ स. । च इति चेद्गल
लामस्यधर्मस्य गरिष्ठोपवृंहितं वचो मत्तावनमर्षिर्नात्र ब्यत्कर्णयोः पिबन् १५ सचिरंमायया
विलोप्तांप्यन्तः कर्षितोमरुषाम् श्रिव वागमरतेध्वत्तस्तेण पुंजस्समब्रवीत् १६ अ ह च
अहोर्द्ध्वस्थवेवयो यह्दृविभाव्यापरीरितोणम यत्रमंतीशानव्यानिरलवेतिजनादीश्वराः १७

धर्मस्य हृस्यापुत्रं नृमस्तामस्टेवचः कर्णाभ्यां पिबत्रात्मस्थेन अलमितितानामत्यतनकर्णयोरस्तायेत
नरतियः १४ श्रिवस्वागांचमस्तेनेत ध्वस्तः स्तेणपुंजोयस्मः आर्यैर्लीलाद्दुर्विभाव्यास्रवनर्मा
यययाईक्षितत्व्यानिरलनियमानिभक्तानितरानादीश्वराः स्ययंनमेनिरलवंलिचेतिः १७

भा अथवा लोकसंग्रहमात्रमेतदित्याह धर्ममिति प्रवक्तारोपि स्वयं देहिनां धर्ममाचरन्ति ४० ना-
द्वा नेन तत्प्रभावतिरस्कारः कथमयं क्रियते तत्राह नेति एतावता लोकसंग्रहमात्रेण तैर्मना-
३६ दिभिः कर्मभिः स्वमायामयी वृत्तिर्येषु तैः भगवतो मायिनस्तस्यानुभावो न दुष्यति यतः प्रसिद्धस्य
मायिनः कुहकं कपटं यथा तत्पेला निननाटीति अतस्तस्य यथा कुहकेनात्मानुभावो दुष्यति न त-
इति तद्वत् प्रदुष्येतेति पाठे नकारः स्वदृष्टान्तेन योज्यः ४१ मायाचेष्टितं प्रपंचयति स एष इति स्वमहिम

धर्मं ग्राहयितुं प्रायः प्रवक्तारश्च देहिनां आचरन्ननुमोदेत क्रियमाणं स्तुवन्ति च ४० नैतावता
भगवतः स्वमायामयवृत्तिभिः न दुष्येतानुभावस्तैर्मायिनः कुहकं यथा स एष एतमनसा विस्मिता
त्मा नानुप्रविश्य यः गृहेः कुर्वन् क्रिया भाति कालेऽवन् समरंपया ४२ तमेनमभगवते त्रिगुणा
यगुणात्मने केवलायाद्वितीयाय यत्परं ब्रह्म मन्यते ४३ कं वृणीत परं भूमन् वरं त्वद्वरदर्षणा
त् यत्दर्शनात् पूर्णकामः सत्यकामः पुमान् भवेत् वरमेकं वृणीथापि पूर्णात् कामाभिवर्षणा
त् भगवत्यच्युते भक्तिं तत्परेषु तथा त्वयि ॥स्तनु॥ स्त्रियं ते नाभि भूत स्वस्य निनास्त्रकया
गिरा तमाह भगवांश्छिन्नः पार्वण्या चाभिनन्दितः ४४
पीत्वा विद्यां विचेष्टितेह दर्शितः ३ त्रिगुणाते पितृजीव वत्सलं अभिभू तायकिं तगणानामात्मने तिर्यञ्चे ४२
वरं वृणीथेति यदुक्तं तत्राह कमिति वरं दर्शनं यस्मात्तस्मात्ततः परं कं वरं वृणीय यस्त्वत् वर
दर्शनात् पूर्णकामः सर्वानन्दसन्दोहरूपः सत्यकामः यथेच्छे प्राप्तसर्वानन्दः ४३ वरदानाय प्रथमे ३६
व प्रवृत्तः पार्थ पाञ्चमयं चाभिनन्दितः अनमोदितः सत्राह ४४

कामो यं सर्वो पि ग्रन्थश्च पुराणं यशः । गुणादि ब्रह्म सर्वज्ञे स्थितं तेन मयादित्यत्र तेरणान्वयः पतत्त्वमयो ह्यनजे
भक्तिमाव ॥ १५ तस्मात् कर्मतपस्त्वादि सिद्धैः पुराणं मतं च भगवन्मायायां विभवं तत्र कथ्यते ॥ १६ अथ वा सोम
हायोगमहिमायेनमः ॥ १८ एतन्मार्कण्डेयस्य चरितं तेन मानं भजं च भगवन्मायायां विभवं तेन वर्णितं ॥ १९ न
वेवमयस्य नलोलत्वन्मयाध्यायमस्य कल्पापूर्व्वहैहस्यमानेविरहमेव तत्राह एतन्मार्कण्डेयेनानुभ
तं भगवन्मायायां विभवं नानाकल्परूपं कादाचित्कं १ ग्रीरे कृष्यानस्थैवाक स्थितं तत्सर्वं मायारचितं एतत् केचि

कामसत्तेयं महर्षे स्तमक्तिसंस्त्रमयो ह्यजे स्याकल्पान्तायशः पुराणमजरामरतान्तथा ॥ १५ सो
त्रैकालिकं ब्रह्म विज्ञानं च विरक्तिमत् ब्रह्मवर्चस्विनो भूयात् पुराणाचार्य्यता स्तुते ॥ १६
सू ३ च एवं वरान् स मुनये दत्त्वागात् त्र्यक्ष ईश्वरः देव्यै तत्कर्म कथयन्ननुभूतं पुरामुनेः ॥ १७
सो प्येवं न महायोगमहिमा भार्गवोत्तमः विचरत्यधुनाप्यद्धा हरावेकान्ततां गतः ॥ १८ अनुव
र्णितमेतत्ते मार्कण्डेयस्य धीमतः अनुभूतं भगवतो मायावैभवमद्भुतं एतत्केचिदविद्वांसो
मायासंसृतिमात्मनः अनाद्यावर्तितं नॄणां कादाचित्कं प्रचक्षते ॥ २० य एवमेतद्भृगुवर्य व
र्णितं रथाङ्गपाणेरनुभावभावितं संश्रावयेत्संशृणुयादु तावुभौ तयोर्न कर्माशयसंसृतिर्भवेत् ॥ २१

। श्री ८ स्कं ८ अ॰ ९ ॥

त अनादिविवर्तकालेनावर्तितं दैवयोगसहस्रहूयमानेन पुनः पुनः परिवर्तितं च तत्तेन नृणां संसृतिः
सृष्टिप्रलयादिलक्षणां आत्मनो भगवतो मायेत्येवमविद्वांसः विद्वांसस्तु मायापि विष्णोः स्वांशो
त्कामास्थायां सन्तरूपस्वरूपमप्रवेशानितिर्मतः समस्तकल्पनं तत्त्वं मायावेषानिवर्तते अतो न वि
वेशमहत्त्वर्थः ॥ ४० संशृणुयात् तस्य श्रावयेत् तयोरुभौतयोः कर्माशयाः संसृतिर्न भ॰

भा० एकोदेशेन पूजार्थं महापुरुषवर्णनं । देवदूहस्य वाख्यानप्रतिमासं पृथक्पृथक् १ येनासर्वमिदमाप
टी० ञोमत्यो सो भगवतो नमः तेएकृतिक्रियायोगो सर्गसंयोगादिकल्पितं २ अथेति हृषभगवद्यतोम
१२ वान्मसस्तं तत्र गदितं तेनसविन १ प्रथममाह नेत्रिकायति वरिवर्णोयां रूपासनार्थे विषयेकेवल
यचैतन्यचैतन्यसृज्यानिपादादीनीयुगोगानि नहरादीनि आयुधानि सुदर्शनादीनि आकल्पाः कौस्तु
भादयस्तैर्हैर्देर्वित्यथाकल्पयंति येप्सितास्तैः कल्पयंतितत्रोवर्णयति १ तद्रूपदेशनास्थाना ।

श्लोकः ॥ अथैषसर्वं एकामोभवेतवदूविनम् समस्तंतंत्रगदितंतेभवान्भगवतनविन
१ नेत्रिकायरिवर्णयांकेवलस्यश्रियःपतेः अंगोपांगायुधाकल्पैकल्पयंतियथैवयैः
२ तन्नोवर्णयमहंतेक्रियायोगंवुभूत्सताम् येनक्रियानैपुणेनमर्त्योयायादमर्त्यतां १
स्तवः ॥ नमस्कृत्वागुरून्वक्ष्येविभूतीर्वैष्णवीरपि याःप्रोक्तावेदतंत्राभ्यामाचार्यैःपद्म
जादिभिः ४ मायाद्यैर्नवभिस्तत्वैःसविकारमयोविराट् निर्मितोदृश्यतेयत्रसचित्के
भुवनत्रयम ५
दस्यार्थं तत्रमस्कारपूर्वकमाह नमस्कृत्वेतिविभूतीःविराड्विग्रहाद्याः ४ अंगादिकल्पनां
भवादिभिर्दर्शयितंप्रथमंतावद्यथाकल्पेतीतिप्रश्नस्यैवराजरूपेणोन्पत्तंवृक्कविराड्विग्रह
माह मायाद्यैःप्रकृतिसूत्रमहदहंकारपंचतन्मात्रैनेवभिस्तत्वैः विकारएकादशेंद्रियाणिपंच
महाभूतानीतिषोडशतन्मयोविराट्सःप्रसिद्धानिर्मितःयत्रविराजिसचित्केचेतनाधिष्ठितेभ १०
वनत्रयंदृश्यते अतेनांगादिकल्पनसोलभंदर्शितं ५ ॥

एतद्वैपौरुषंरूपंपुरुषस्यवैराजस्यरूपमेवेश्वरेणाधिष्ठितंतज्जातंतद्भेदंविवृतंतत्स्वरूपमुच्यते
अंगकल्पनामाह भूःपादावित्यादिभिः भगवतःअवात्वेनभावनायाद्दृष्टिभावनाविधीयते ६ प्रजा-
ननंमेढ्रंअपानःपायुः ८ अनंतकमन्यदप्येवंसंक्षिप्याह यावानयमितिपुरुषःसमानतःसम-

एतद्वैपौरुषंरूपंभूःपादौद्यौःशिरोनभः नाभिःसूर्योक्षिणीनासेवायुःकर्णौदिशःप्रभोः।
धरो प्रजापतिःप्रजननमपानोमृत्युरीशितुः तद्बाहवोलोकपालामनश्चंद्रोभ्रुवौयमः ७ ल-
ज्जोत्तरोधरोलोभोदंताज्योत्स्नास्मयोभ्रमः रोमाणिभूरुहाभूम्नोमेघाःपुरुषमूर्द्धजाः ८ यावान-
यंवैपुरुषोयावत्यासंस्थयामितः तावानसावपिमहापुरुषोलोकसंस्थया कौस्तुभव्यप-
देशेनस्वात्मज्योतिर्बिभर्त्यजः तत्प्रभाव्यापिनीसाक्षाच्छ्रीवत्समुरसाविभुः स्वमायांवन-
मालाख्यांनानागुणमयींदधत् वासश्छंदोमयंपीतंब्रह्मसूत्रंत्रिवृत्स्वरं ११ बिभर्तिसां-
ख्यंयोगंचदेवोमकरकुंडले मौलिंपदंपारमेष्ठ्यंसर्वलोकाभयंकरं १२ अव्याकृतमनं-
ताख्यमासनंयदधिष्ठितः धर्मज्ञानादिभिर्युक्तंसत्वंपद्ममिहोच्यते १३

वितस्तिसंस्थयायावत्परसन्निवेशेनमितः ९ भूषणादीन्याह कौस्तुभेत्यादिना स्वात्मज्योतिःशु-
द्धजीवचैतन्यंयात्तस्यकौस्तुभस्यप्रभानामेवश्रीवत्संबिभर्ति १० त्रिवृत्स्वरंत्रिमात्रंप्रणवं ११ पदंपा-
रमेष्ठ्यंपदंब्रह्मलोकं १२ अव्याकृतंप्रधानंयदनंताख्यमधिष्ठितः अधिष्ठायस्थितः तदासनरूपंपद्मंस-

भा॰
द्वा॰
१८

मुख्यतत्त्वं प्राणतत्त्वं प्राणो वै मुख्य इति श्रुतेः दरवरं शङ्खं १४ आकूतीः क्रियाशक्तियुक्तं मनः अस्य र
थस्थमभिव्यक्तिः बहिरभिव्यक्तं रूपं मुद्रयार्थक्रियात्मतया अर्थे क्रियात्मतां वरदाभयदादिरूपत्वं बिभर्ति तत्तन्मु
द्राप्रदर्शनेनाभावयेदित्यर्थः १६ मण्डलं देवयजनं देवपूजाभूमिं सूर्यमण्डलत्वेन भावयेदित्यर्थः अग्निवह्नि
मण्डलवादी दीक्षां संस्कारमात्मनः गुरुकृतां मन्त्रदीक्षामेव आत्मनस्तत्रयोग्यतां भावयेदित्यर्थः

ओजः सहो बलयुतं मुख्यतत्त्वं गदां दधत् अपां तत्त्वं दरवरं तेजस्तत्त्वं सुदर्शनं नभोनिभं नभ
स्तत्त्वमसिं चर्म तमोमयं कालरूपं धनुः शार्ङ्गं तथा कर्ममयेषुधिं १५ इन्द्रियाणि शराना
हुराकूतीरस्य स्यन्दनं तन्मात्राण्यस्याभिव्यक्तिं मुद्रयार्थक्रियात्मतां १६ मण्डलं देवयजनं
दीक्षा संस्कार आत्मनः परिचर्या भगवत आत्मनो दुरितक्षयः १७ भगवान् भगशब्दार्थं ॥
लीलाकमलमुद्वहन् धर्मं यशश्च भगवांश्चामरव्यजनेऽभजत् १८ आतपत्रं तु वैकुण्ठं द्विजा
धामाकुतोभयं त्रिवृद्वेदः सुपर्णाख्यो यज्ञं वहति पूरुषं १९ ॥

परिचर्येति भगवतस्तोपरिचर्या
आत्मनः कल्मषक्षयाय एवं रूपं भावयेदित्यर्थः १७ पूर्वेषामनपेक्षमतमिदानीं हस्तस्थपद्ममाह
भगवानिति भगवच्छब्दार्थं ऐश्वर्यादिषाड्गुण्यं १८ हे द्विजाः एकवचनान्तो वा पाठः अकुतोभयं
कैवल्यं धामरहितं समभजत षष्ठी वैकुण्ठस्य विशेषणमकुतोभयं यज्ञमिति त्रिवृत् अत्र नः सा
मरूपो वेदः सुपर्णाख्यो गरुत्मांस्त्रिवृत्तत्र रत्नादिमन्त्रलिङ्गात् यज्ञो यज्ञस्वरूपं पुरुषं यजनीयं विष्णुं

अनपायिनी हरेः प्राप्तिः तत्र हेतुः साक्षादात्मनः स्वस्वरूपस्य चिद्रूपत्वात् स्यात् स्वभेदादित्यर्थः
तत्र मूर्तिः पंचरात्रागमानुरूपः येऽर्चामात्राद्यैर्हि गणाः सेहोर्हरिः पालानेदारूपः २ तस्यैव चतु।
र्व्यूहोपासनामाह वासुदेवादिरूपैर्हि पुरुषः श्रीनारायण एव स्वयं मूर्तिभेदेन पास्यत्वमभिधीयते।
२१ तस्यैव व्याख्यातृत्वेन चतुर्व्यूहोपासनामाह सर्वभगवान् विष्णवादिरूपैर्हि हेतिभिः जाग्रदाद्यवस्थाभिः

अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः विष्वक्सेनस्तत्र मूर्तिर्विदितः पार्षदाधिपः
२ नंदादयोऽहास्यास्ते गणा मायाहेरेर्गणाः वासुदेवः संकर्षणः प्रद्युम्नः पुरुषः स्व
यं स्थितिहरिरनिरुद्धस्तन्मूर्तिर्व्यूहोऽभिधीयते २१ स विष्वक्सेनः प्राप्तस्तरीय स्थितिवृत्ति।
भिः अर्थो द्विधा प्राप्यत्वात्तेर्भगवान् परिभाष्यते २२ अंशेनांगाद्यथा कल्पे भगवान् स चतुष्ट
यम् विभक्ति स चतुर्मूर्तिर्भगवान् हरिरीश्वरः २३

परिभाष्यते तद्व्युपाधीनाह अर्थो वासुः ३ इंद्रियं मनः आप्रायस्तद्भवसंस्कारयुक्तमन्ता।
नेत्तानेति तत्पदमाविलितैः २२ उक्तचतुर्व्यूहद्वयोपासनेऽपि एवं कमगायुपासनामाह अंशेति अंशा
दिभिरूपलक्षितो भगवान् श्रीवासुदेवादिचतुर्मूर्तिः स च विष्णवादिचतुष्टये विभक्ति स विष्णवादि
भावेपि तत्त्रियं तत्स्वतज्जीवत्वमित्याह विष्णवादिचतुष्टये विभक्तोपि भगवानीश्वर एवेति २३

भा॰
द्वा॰
२९

तस्य ब्रह्मादिविभूतित्वमाह द्विजऋषभेति स एव भगवान् ब्रह्मयोनिर्वेदस्य कारणमित्यादि हेतुत्रयं
वस्तुतो भेदाभावेऽपि च स्वमायया सृजति हरति पातीति कृत्वा आख्यायते ब्रह्मादिरूपया अनावृतात्मतः
अनाच्छन्नज्ञानोऽपि विवृतत्वाभिन्नत्वनिरुक्तः प्राक्तेषु तत्परैः त्रयस्त्रविमूढत्वं भेदप्रमाणापत्ति यत
स्तत्त्वारोपमात्रत्वेनैव कल्पमतारति २४ यद्येवमुपासनमुक्तेन श्रीकृष्णं प्रार्थयते कृष्णसखेत्यर्जुन

द्विजऋषभ स एष ब्रह्मयोनिः स्वयंदृक् स्वमहिमपरिपूर्णो मायया च स्वयैतत् सृजति हर
ति पातीत्याख्ययानावृताक्षो विवृत इव निरुक्तस्तत्परैरात्मलभ्यः २४ श्रीकृष्ण कृष्णसख
वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य गोविन्द गोपवनिताव्रजभृत्यगीततीर्थ
श्रवः श्रवणमङ्गल पाहि भृत्यान् २५ य इदं कल्य उत्थाय महापुरुषलक्षणम् तच्चि
त्तः प्रयतो जप्त्वा ब्रह्म वेद गुहाशयम् २६

सख वृष्णिश्रेष्ठ अवनेर्द्रुहो ये राजन्याः तेषां वंशस्य दहन अनपवर्गं अक्षीणं वीर्यं यस्य गोपवनि
तानां व्रजस्थाः सुहृदः भृत्या नारदादयः तैर्गीतं तीर्थं श्रवः कीर्तिर्यस्य श्रवणमेव मङ्गलं यस्य
२५ एतन्नामजपमात्रस्यापि ब्रह्मज्ञानफलमित्याह य इति कल्ये प्रातःकाले यस्तच्चित्तः प्रयतः स
विशुद्धं तज्जपित्वा गुहाशयं हृदिस्थं ब्रह्म प्राप्नोति २६ ॥

मंडले देवयजनमित्युक्तं तद्विभागतः स्फुटीकर्तुं प्रश्ने शौनकः विष्णुरातोत्र पृच्छति शुक आह तत्पंचमे पा-
दाहृतं तथापि ऋषयो गंधर्वा अप्सरसो नागा ग्रामण्यो यातुधाना देवा इत्येकैकशो गणाः सप्तनाना-
दिशोः सूर्यसंबंधी सप्तानां गणः २७ तेषां संयुक्तानामधीश्वरैः तत्तन्मासपतिभिः तत्तन्मासाधिकृतसूर्यै-
र्वा व्यूहं विभागं २८ तत्र तावत् व्यूहनिरूपयितुं प्रथमं सूर्यस्वरूपमाह अनाद्यविद्यया मायया अ-
यं सूर्यः लोकतंत्रः लोकयात्राप्रवर्तकः २९ अनंतस्तस्य क्रियाभेदोपाधिकमेव नानात्वं न स्व-

शौ नक उवाच शुको यदाह भगवान्विष्णुरातायशृण्वते सौरो गणो मासि मासि नानावस
ति सप्तकः २७ तेषां नामानि कर्माणि संयुक्तानामधीश्वरैः ब्रूहि नः श्रद्दधानानां व्यूहं सू
र्यात्मनो हरेः २८ सू उ च अनाद्यविद्यया विष्णोरात्मनः सर्वदेहिनां निर्मितो लोकतं
त्रोयं लोकेषु परिवर्तते २९ एक एव हि लोकानां सूर्य आत्मादिकृद्धरिः सर्ववेदक्रिया-
मूलमृषिभिर्बहुधोदितः ३० कालो देशः क्रिया कर्ता करणं कार्यमागमः द्रव्यं फल
मिति ब्रह्मन्नवधोक्तोजया हरिः ३१

तदेवाह एक एवेति सूर्य आत्मा जगतस्तस्थुषश्चेति श्रुतेः जगदात्मा आदिकृत्स्रष्टापि कर्ता
हरिरेव सूर्यः सच सर्ववेदोक्तक्रियाणां मूलं सन् तेनोपाधिना बहुधोक्तः ३० कालरूपधा
रिणो हरेर्द्वादशादित्यरूपभेदं क्रियोपाधिकं दर्शयितुं प्रथमं सर्वकर्मप्रवर्तनयोग्यतासाधकत्वेन नवधा
भेदमाह कालइति कालः प्रातरादिः देशः समादिः क्रिया अनुष्ठानं कर्ता ब्राह्मणादिः करणं समा
दि कार्यं यागादि आगमः मंत्रादिः द्रव्यं व्रीह्यादि फलं स्वर्गादि ३१

भा० द्वा० ५

तत्र कालरूपधारी भगवान्पृथक् चरति मध्वादिषु चैत्रादिषु लोकतंत्राय लोकयात्रानिर्वाहाय ३२ तानेवा
गणनाह धातेति द्वादशभिः धाता सूर्यः कृतस्थली अप्सराः हेती राक्षसः वासुकिर्नागः रथकृत् यक्षः
पुलस्त्य ऋषिः सेतुंबुरुर्गंधर्वः ३३ अर्यमा सूर्यः पुलह ऋषिः अथौजा यक्षः प्रहेतिः राक्षसः नारदो गंध
र्वः कच्छनीरो नागः पुंजिकस्थली अप्सराः माधवं वैशाखं ३४ मित्रः सूर्यः अत्रिर्ऋषिः पौरुषेयो राक्ष
सः रथस्वनो यक्षः तक्षको नागः मेनका अप्सराः हाहा गंधर्वः शुक्रमासं ज्येष्ठं नयंत्यनुवर्तयंति ३५ व

मध्वादिषु द्वादशसु भगवान्कालरूपधृक् लोकतंत्राय चरति पृथक् द्वादशभिर्गणैः ३२ धाता
कृतस्थली हेतिर्वासुकी रथकृन्मुने पुलस्त्यस्तुंबुरुरिति मधुमासं नयंत्यमी ३३ अर्यमा पुल
होथौजाः प्रहेतिः पुंजिकस्थली नारदः कच्छनीरश्च नयंत्येते स्म माधवम् मित्रोत्रिः पौरुषेयोथ
तक्षको मेनका हहाः रथस्वन इति ह्येते शुक्रमासं नयंत्यमी ३५ वसिष्ठो वरुणो रंभा सहजन्य
स्तथा हूहूः शुक्रश्चित्रस्वनश्चैव शुचिमासं नयंत्यमी इंद्रो विश्वावसुः श्रोता एलापत्रस्तथां
गिराः प्रम्लोचा राक्षसो वर्यो नभोमासं नयंत्यमी ३७ विवस्वानुग्रसेनश्च व्याघ्र आसारणो भृ
गुः अनुम्लोचा शंखपालो नभस्याख्यं नयंत्यमी ३८

रुणः सूर्यः वसिष्ठ ऋषिः रंभा अप्सराः सहजन्यो यक्षः हूहूर्गंधर्वः शुक्रो नागः चित्रस्वनो राक्षसः शु
चिमासमाषाढं ३६ इंद्रः सूर्यः विश्वावसुर्गंधर्वः श्रोता यक्षः एलापत्रो नागः वर्यो राक्षसः इति स्वयमे
व व्याख्यातम् अंगिरा ऋषिः प्रम्लोचा अप्सराः नभोमासं श्रावणं ३७ विवस्वान्सूर्यः उग्रसेनो गंध
र्वः व्याघ्रो राक्षसः आसारणो यक्षः भृगुरृषिः अनुम्लोचा अप्सराः शंखपालो नागः नभस्याख्यं भाद्र

भा० द्वा० ५

धनंजयो नागः वातो राक्षसः सुषेणो गंधर्वः पूषा सूर्यः सुरुचिर्यक्षः घृताची अप्सराः गौतम ऋ
षिः तपोमासे माघे मासे क्रमात् तिलं चनकोंऽपि नाद्भिरयं क्रमान् सारेणावेक्ष्य वेत्तमाषक्रमेण तत्त्वा तिः
क्रमित्रमस्य ब्रह्मकल्पभेदे चेतितेयं ५९ ऋतुर्यक्षः वर्चा राक्षसः पर्जन्यः सूर्यः सेनजित् अप्स
रा विश्वा गंधर्वः ऐरावतो नागः भरद्वाज ऋषिः तपस्याख्ये फाल्गुने ५ अंशुः सूर्यः अप्सराः निशा
ठः कश्यप ऋषिः तार्क्ष्योपत्यः ऋतसेनो गंधर्वः उर्वशी अप्सराः विद्युच्छत्रुः राक्षसः महाशंखो ।

पूषा धनंजयो वातः सुषेणः सुरुचिस्तथा घृताची गौतमश्चेति तपोमासं नयन्त्यमी ५९ क्र
तुर्वर्चा भरद्वाजः पर्जन्यः सेनजित्तथा विश्वैरावत अश्चैव तपस्याख्यं नयन्त्यमी ५ अंशुः
पुः कश्यपस्तार्क्ष्य ऋतसेनस्तथोर्वशी विद्युच्छत्रुर्महाशंखः सहोमासं नयन्त्यमी ५१ भगः
स्फूर्जोऽरिष्टनेमिश्च ऊर्णआयुश्च पंचमः कर्कोटकः पूर्वचित्तिः पुष्यमासं नयन्त्यमी ५२ त्वष्टा
ऋचीकतनयः कंबलाश्वश्च तिलोत्तमा ब्रह्मापेतोऽथ शतजिद्धृतराष्ट्र इषंभराः ५२ विष्णुर
श्वतरो रंभा सूर्यवर्चाश्च सत्यजित् विश्वामित्रो मखापेत ऊर्जमासं नयन्त्यमी ५५

नागः सहोमासे मार्गशीर्षे ५१ भगः सूर्यः स्फूर्जो राक्षसः अरिष्टनेमिर्गंधर्वः पूर्वचित्तिः अप्स
रा ऊर्णायुर्यक्षः आयुर्ऋषिः कर्कोटको नागः ५२ त्वष्टा सूर्यः ऋचीकतनयो जमदग्निः ऋषिः कं
बलाश्वो नागः तिलोत्तमा अप्सराः ब्रह्मापेतो राक्षसः शतजिद्यक्षः धृतराष्ट्रो गंधर्वः इषंभराः अ
श्विनपालकाः ५२ विष्णुरादित्यः अश्वतरो नागः रंभा अप्सराः सूर्यवर्चा गंधर्वः सत्यजिद्यक्षः म

मखापेतो राक्षसः विश्वामित्र ऋषिः ऊर्जमासे कार्त्तिके ५५

भा
द्वा
४१

एतेवासिन्यादयः कौर्मिविभक्त्योक्ताः धातार्यमा च मित्रश्च वरुणश्चेन्द्र एव च विवस्वानथ पूषा च पर्जन्यो
श्चांशुरेव च १ भगस्त्वष्टाथ विष्णुश्च आदित्या द्वादश स्मृताः पुलस्त्यः पुलहश्चात्रिर्वसिष्ठोथांगि
रा भृगुः गौतमोथ भरद्वाजः कश्यपः क्रतुरेव च २ जमदग्निः कौशिकश्च मुनयो ब्रह्मवादिनः ३
रथकृच्चौरिष्टनेमिर्ग्रामणीश्च रथस्वनः रथचित्रस्वनः श्रोता अरुणः सेनजित्तथा ४ नर्कश्चारि
ष्टनेमिश्च ऋतजित्सत्यजित्तथा एते पतीः समाख्याता नामभिर्द्वादशैव तु अथ हेतिः प्रहेतिश्च पौ
रुषेयो वधस्तथा ५ वर्यो व्याघ्रस्तथापश्च वायुर्विद्युद्दिवाकरः ब्रह्मापेतश्च विप्रेन्द्र यज्ञापेतश्च

एता भगवतो विष्णोरादित्यस्य विभूतयः स्मरतां सन्ध्य
योर्नृणां हरन्त्यंहो दिने दिने ४५ ॥

रा तथा ६ वासुकिः कच्छनीरश्च तक्षकः सर्पपुंगवः एलापत्रः शंखपालस्तथैरावतसंज्ञितः
७ धनंजयो महापद्मस्तथा कर्कोटको द्विजाः कंबलोश्वतरश्चैव वहन्त्येवं यथाक्रमं ८ तुंबुरुर्नार
दो हाहा हूहूर्विश्वावसुस्तथा उग्रसेनो वसुरुचिर्विश्वावसुरथापरः ९ चित्रसेनस्तथोर्णायुः
धृतराष्ट्रो द्विजोत्तमाः सूर्यवर्चा द्वादशैते गन्धर्वा गायतो वराः १० क्रतुस्थल्यप्सरो वर्या तथान्या
पुंजिकस्थली मेनका सहजन्या च प्रम्लोचा च द्विजोत्तमाः ११ अनुम्लोचा घृताची च विश्वाची चो
र्वशी तथा अन्या च पूर्वचित्तिः स्यादन्या चैव तिलोत्तमा रंभा चेति द्विजश्रेष्ठास्तथैवाप्सरसः १

४१

तेषां पृथक्कर्माणि निरूपयति द्वादशस्वपीति त्रिभिः असौ देवः सूर्यः षड्भिर्गणैरादिभिः अस्य जनस्य
समंताच्चरन् शुभां मतिं तनुते गायत्र्यो नेन स्तुवितः ४६ तल्लिङ्गैः सोऽर्थप्रकाशैः ४७ उन्नह्यंति दृढं।

द्वादशस्वपि मासेषु देवोऽसौ षड्भिरस्य वै चरन्समंतात्तनुते परत्रेह च
सन्मतिं ४६ सामर्ग्यजुर्भिस्तल्लिङ्गैरृषयः संस्तुवन्त्यमुं गंधर्वास्तं प्रगा
यंति नृत्यंत्यप्सरसोऽग्रतः ४७ उन्नह्यंति रथं नागा ग्रामण्यो रथयोजकाः चो ग्रा
दयंति रथं पृष्ठे नैरृता बलशालिनः ४८ वालखिल्याः सहस्राणि ष
ष्टिर्ब्रह्मर्षयोऽमलाः पुरतोऽभिमुखं यांति स्तुवंति स्तुतिभिर्विभुम् ४९
एवं ह्यनादिनिधनो भगवान्हरिरीश्वरः कल्पे कल्पे स्वमात्मानं व्यूह्य लो
कानवत्यजः ५० इति श्रीभागवते महापुराणे द्वादशस्कंधे एकाद
शोऽध्यायः ११

बध्नंति ग्रामण्यो यंतारः नैरृता नाम बलाः ४८ किंच वालखिल्या इति षष्टिः प्रतिमासं तत्र एव विभुं सूर्यं ४९
स्वं व्यूह्य विभज्य ५० इति द्वादशस्कंधे एकादशः ११ ॥

भा० द्वा० ५२

द्वादशे तु पुराणोक्तसर्वार्थानुक्रमः कृतः प्रथमस्कंधमारभ्य प्राधान्येन समासतः १ तदेव समस्तपुरा-
णोक्तानर्थान्संक्षेपतोऽवर्णयिष्यन् धर्मोद्देशेन प्रणमति नम इति महते हरिभक्तिलक्षणाय ब्राह्मणे-
भ्यः ब्राह्मणान्सनातनान्धर्मान्निरूपलक्षणान्पुराणोक्तार्थान् १ पृष्टवते इति चिंतं श्रवणादियोग्यं २
एतदद्भुतं वदति अत्रेति भगवान्नैश्वर्यादिषड्गुणः साक्षात्संकीर्तितः इति देवताकांडार्थः १ ब्रह्म-
कांडार्थमाह अत्र ब्रह्मेति यस्मिन्निर्गुणं प्रभवाप्ययं प्रभवन्त्यस्मादिति प्रभवं अप्ययंत्यस्मिन्निति अप्ययं तत्

सू० उ० च नमो धर्माय महते नमः कृष्णाय वेधसे ब्राह्मणेभ्यो नमस्कृत्य धर्मान्वक्ष्ये स-
नातनान् एतद्वः कथितं विप्रा विष्णोश्चरितमद्भुतं भवद्भिर्यदहं पृष्टो नराणां पुरु-
षोचितं २ अत्र संकीर्तितः साक्षात्सर्वपापहरो हरिः नारायणो हृषीकेशो भगवा-
न्सात्वतां पतिः ३ अत्र ब्रह्म परं गुह्यं जगतः प्रभवाप्ययं ज्ञानं च तदुपाख्यानं प्रोक्तं
विज्ञानसंयुतं ४ भक्तियोगः समाख्यातो वैराग्यं च तदाश्रयं पारीक्षितमुपाख्या-
नं नारदाख्यानमेव च ५

ज्ञेयं तच्च अनेनाश्रयशब्दार्थो दर्शितः विज्ञानसंयुतं अपरोक्षज्ञानपर्यंतं ज्ञानं तदुपाख्यानेन तज्ज्ञा-
नमुपाख्यायते येन तत् ज्ञानसाधनमित्यर्थः ४ कर्मकांडार्थमाह भक्तियोगश्च साधनरूपः तदा-
श्रयं भक्तियोगेन निष्पादितं एवं सामान्यतो निरूप्येदानीं द्वादशस्कंधप्रकरणार्थानुक्रामति पारी-

क्षितमुपाख्यानं प्रायोपवेशो राजर्षेः ५

५२

च श्लोकैर्ब्रह्मणो नमस्कार इति प्रथमस्कंधार्थः १ उक्तोतिर्विराट्दितिः प्राधानिकः प्रधानकार्यविरूपः स्व-
गतः स्वाद्धितः महदादिक्रमेणोत्पत्तिः इति द्वितीयस्कंधार्थः २ महापुरुषसंस्थितिः प्रलये नस्तोमवा-
स्यांते ३ प्राकृतिभवो गणतोभद्रूपः वैकृतिकामहादायः कारणिकारणश्चपेतयोस्तेषां च सर्गः ४

प्रायोपवेशो राज्ञोर्विप्रशापात्परीक्षितः शुकस्यैव ब्रह्मर्षेः संवादश्च परीक्षितः ६ येन धारणा
योक्ता तिः संवादो नारदाजयोः अवतारानुगीतं च सर्गः प्राधानिकोऽग्रतः २ विदुरोद्धवसंवादः त
तमैत्रेययोस्ततः पुराणसंहिताप्रश्नो महापुरुषसंस्थिति १ ततः प्राकृतिकः सर्गः सप्त वैकृ
तिकाश्च ये ततो ब्रह्मांडसंभूतिर्वैराजः पुरुषो यतः ४ कालस्य स्थूलसूक्ष्मस्य गतिः पद्मसमु
द्भवः भवरुद्धरणेभोयो हिरण्याक्षवधो यथा १ ऊर्ध्वतिर्यगवाक्सर्गो रुद्रसर्गस्तथैव च अर्द्ध
नारीनरस्याप्ययतः स्वायंभुवो मनुः ११ शतरूपा च या स्त्रीणामाद्या प्रकृतिरुत्तमा संतानो धर्मपत्नी
नो कर्दमस्य प्रजापतेः १२ अवतारो भगवतः कपिलस्य महात्मनः देवहूत्याश्च संवादः कपिले
न च धीमता १३ नवब्रह्मसमुत्पत्तिर्दक्षयज्ञविनाशनं ध्रुवस्य चरितं पश्चात्पृथोः प्राचीनबर्हिषः
१४

गतिः स्वरूपं रुद्राणीरुदाणो १ अर्द्धांभोनारीच नरश्च तस्य ११ संतानो धर्मपत्नीनामिति नवब्रह्म
समुत्पत्तिरित्यस्यानंतरं द्रष्टव्यम् १२ १२ चतुर्थस्कंधमाह नवब्रह्मणां मारीच्यादीनां समुत्पत्तिः

श्री

भा. पंचमस्कंधार्थमाह ततः प्रियव्रतेति प्रियव्रतस्य चरितं १५ द्वीपाद्युपवर्णनं प्रथमे संक्षेपतः ततो द्वीपादी
ह्रा. नां विस्तरेणोत्तरग्रन्थे तेषामुपवर्णनं पातालनरकादीनां च स्थितिः अनेनैव नरकनिवर्तकमन्तामि
५१ लोपाख्यानं रहितं ततः प्राचीनं १६ षष्ठमाह दक्षजन्मेति सप्तमार्थमाह पुत्रयोश्चेति १८ अष्ट।

नारदस्य च संवादस्ततः प्रैयव्रतं द्विज नाभेस्ततोऽनुचरितमृषभस्य भरतस्य च १५ ततो द्वीपसमु
द्राद्रिवर्षनद्युपवर्णनं ज्योतिश्चक्रस्य संस्थानं पातालनरकस्थितिः १६ दक्षजन्म प्रचेतोभ्य।
स्तत्पुत्रीणां च संततिः यतो देवासुरनरास्तिर्यङ्नगखगादयः त्वाष्ट्रस्य जन्म निधनं पुत्रयोश्च दि
तेर्द्विजाः दैत्येश्वरस्य चरितं प्रह्लादस्य महात्मनः १८ मन्वन्तरानुचरितं गजेन्द्रस्य विमोक्षणं
मन्वन्तरावताराश्च विष्णोर्हयशिरादयः १९ कौर्मं मात्स्यं नारसिंहं वामनं च जगत्पते क्षीरोद
मथनं तद्वदमृतार्थे दिवौकसां २० देवासुरमहायुद्धं राजवंशानुकीर्तनं इक्ष्वाकुजन्म तद्वं
शो सुद्युम्नस्य महात्मनः २१ इलोपाख्यानमत्रोक्तं तारोपाख्यानमेव च सूर्यवंशानुकथनं
शशादाद्या नृगादयः सौकन्यं चाथ शर्यातेः ककुत्स्थस्य च धीमतः खट्वाङ्गस्य च मान्धातुः सौभरेः
सगरस्य च २२ रामस्य कोशलेन्द्रस्य चरितं किल्बिषापहं निमेरङ्गपरित्यागो जनकानां च संभवः
रामस्य भार्गवेन्द्रस्य निःक्षत्रकरणं भुवः ऐलस्य सोमवंशस्य ययातेर्नहुषस्य च २४

मार्थमाह मन्वन्तरानुचरितमिति क्वचित्पाठे विष्णुनिर्युक्तमोक्षः भक्तिरक्षानुकूलत्वेनेति
द्रष्टव्यं १९ नवमार्थमाह राजवंशेति २१ सोमवंशादिभ्यस्त्वैलस्य चरितं २२ २३ २४ २५ ॥ ५२

तन्मतस्याभीप्सा २६ २७ दृष्टामार्थमाह तस्य कर्माणीति पूतनायाश्च सहदितस्यस्तन्यपयसः पाने २८

दौर्घ्यंतेर्भरतस्यापि पुंसतनोस्तत्सुतस्य च यथातेर्गौ पुत्रस्य यदोश्चान्वकीर्तनं २६ यत्रावतीर्णो
भगवान्कृष्णाख्यो जनार्दनः वासुदेवगृहे जन्म ततो वृद्धिश्च गोकुले २७ तस्य कर्माण्युदारा
णि कीर्तितान्यसुरद्विषः पूतनासुपयः पीतं शकटो चाटने शिशोः २८ तृणावर्तस्य निष्पेषस्त
थैव बकवत्सयोः धेनुकस्य सहभ्रातुः प्रलम्बस्य च संक्षयः २९ गोपानां च परित्राणं दावाग्नेः परि
सर्पतः दमनं कालियस्याहेर्महाह्रदे नदीमोक्षणम् ३० व्रतचर्या च कन्यानां यत्र तुष्टोऽच्युतो व्रतैः ।
प्रसादोऽयं तपत्नीभ्यो विप्राणां चानुतापनं ३१ गोवर्द्धनोद्धरणं च शक्रस्य सुरभेरथ यज्ञाभिषेकं
कृष्णस्य स्त्रीभिः क्रीडा च रात्रिषु ३२ शंखचूडस्य दुर्बुद्धेर्वधोऽरिष्टस्य केशिनः अक्रूरागमनं पश्चा
त्प्रस्थानं रामकृष्णयोः ३३ व्रजस्त्रीणां विलापश्च मथुरालोकनं ततः गजमुष्टिकचाणूरकंसा
दीनां च यो वधः ३४ मृतस्यानयनं सूनोः पुनः सान्दीपनेर्गुरोः मथुरायां निवसता यदुचक्रस्य
प्रियं कृतं मद्ववरामाभ्यां युतेन हरिणा द्विजाः ३५ जरासंधसमानीतसैन्यस्य बहुशो वधः घात
नं यवनेन्द्रस्य कुशस्थल्यां निवेशनं ३६ आदानं पारिजातस्य सुधर्मायाः सुरालयात् रुक्मिण्याह
रणं युद्धे प्रमथ्य द्विषतो हरेः ३७ हरस्य जृम्भणं युद्धे बाणस्य भुजकृन्तनं प्राग्ज्योतिषपतिं हत्वा कन्या
नां हरणं च यत् ३८ ॥

सहभ्रातः समस्तस्य ३९ यज्ञाभिषेकं यत्तः एतावच्चभिषेकस्य नयोर्हद्वैके ३१ ३२ द्विषतः प्रागुज्यम।

भा॰ षेवधो दन्तवक्त्रस्य दुर्गतिः सेषां ४९ महात्म्यं प्रभावः ४ एकादशार्थमाह विप्रशापेति धर्मनिर्णयः वर्णाश्रमधर्म
द्वा॰ निश्चयः ४१ मर्त्यपरित्यागः मनुष्यतस्यातहोनं ४२ द्वादशार्थमाह युगेति युगलक्षणानन्तरं नृणां
४४ वृत्तिश्चेत्यर्थः त्रिविधाप्रकृतिकानैमित्तिकानित्याश्चेति ४१ ऋषेर्व्यासस्य सूर्यस्य च विन्यासः इत्यर्थः

वैद्यपौण्ड्रकस्य शृगालस्य दन्तवक्त्रस्य दुर्गतिः शम्बरो द्विविदः पीठो मुरः पञ्चजनादयः ४९ महात्म्यं
च वधस्तेषां वाराणस्याश्च दाहनं भारावतरणं भूमेर्निमित्तीकृत्य पाण्डवान् ४ विप्रशापा
पदेशेन संहारः स्वकुलस्य च उद्धवस्य च संवादो वासुदेवस्य चाद्भुतः ४१ यत्रात्मविद्या ह्य
खिला प्रोक्ता धर्मविनिर्णयः ततो मर्त्यपरित्याग आत्मयोगानुभावतः ४२ युगलक्षण
वृत्तिश्च कलौ नृणामुपप्लवः चतुर्विधश्च प्रलय उत्पत्तिस्त्रिविधा तथा ४२ देहत्या
गश्च राजर्षेर्विष्णुरातस्य धीमतः शाखाप्रणयनमृषेर्मार्कण्डेयस्य सत्कथा ४४ महापु
रुषविन्यासः सूर्यस्य जगदात्मनः इति चोक्तं द्विजश्रेष्ठा यत्पृष्टोऽहमिहास्मि वः लीलाव
तारकर्माणि कीर्तितानीह सर्वतः ४५

इति चोक्तमिति चकारादन्यदपि वः युष्माभिरिह यत्पृष्टोऽस्मि तदुक्तमिति किमेवं नानार्थक
थनेनेत्यत आह लीलेति सर्वतः तत्तदर्थकीर्तनद्वारेणेत्यर्थः ४५ ४५ ॥ ४४

तत्कीर्त्तनेनापि किंचित्रमपेक्षायां तत्फलमाहात्म्यमाह द्वाभ्यां पतितः क्षुद्रादिषु स्खलितः सोपानादिषु आर्त्तः
ज्वरादिना क्षुत्त्वा वा विवशोपि ४६ संकीर्त्यमानः यद्वा श्रुतोनुभावो यस्य सः पुंसां चित्तं प्र
विश्य निःशेषं दुःखं विधुनोतीति हीति सत्तामनुभवप्रमाणमाह अर्कोतिमिरं महाद्रिं वात इव तेन विवर्त्तप
नीत्यपरितोषात् तद्दृष्टान्तान्तरमाह अभ्रमिवातिवात इति ४७ हरिसंकीर्त्तनमेव महाफलं तद्व्यतिरिक्तं

पतितः स्खलितो वार्त्तः क्षुत्त्वा वा विवशो गृणन् हरये नम इत्युच्चैर्मुच्यते सर्वपातकात् ४६
संकीर्त्यमानो भगवाननन्तः श्रुतानुभावो व्यसनं हि पुंसां प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोर्को
भ्रमिवातिवातः ४७ मृषा गिरस्ता ह्यसतीरसत्कथा न कथ्यते यद्भगवानधोक्षजः तदेव सत्यं
तदु हैव मंगलं तदेव पुण्यं भगवद्गुणोदयं ४८ तदेव रम्यं रुचिरं नवं नवं तदेव शश्वन्मनसो
महोत्सवं तदेव शोकार्णवशोषणं नृणां यदुत्तमश्लोकयशोनुगीयते ४९

सर्वं मिथ्यालापमात्रमिति प्रपञ्चयति मृषा गिर इति चतुर्भिः मृषा गिरः मिथ्या वाचः असतीः असत्यः
असत्कथा यासु ताः यत् यासु उत्तमश्लोकस्य यशो न गीयत इति यत् तदेव सत्यं तदेव हि मंगलं
हरतीति हेयं भगवद्गुणानामभ्युदयो यस्मात्तत् सर्वे नवं नवं यथा भवति तथा रुचिरं रुचिप्रदं महान्
उत्सवो यस्मात् ४८ ॥

भा॰
टी॰
४५

विचित्राणि पदानि यस्मिन् तदपि जगत्पवित्रयतीति तत्तथा हरेर्यशो न प्रगृणीत न वर्णयेत् तद्ध्वां-
क्षतीर्थं काकतुल्यानां रतिस्थानं न तु हंसैर्यतिभिः सेवितं न तत्र हेतुः यत्रेति ॥१०॥ स वाग्वि-
सर्गः स एव वाचः प्रयोगः जनताघसंप्लवः जनसमूहपापनाशकः यद्यस्मात्तान्येव श्रद्धैः कीर्त्यमा-
नानि शृण्वन्ति श्रोतरि सति गायन्ति नो चेत्स्वयमेव गृणन्ति ॥११॥ इदानीं ज्ञानकर्मस्थानादपि भगवत्की-
र्तनादिष्वेवादरः कर्तव्य इत्याह नैष्कर्म्यमिति नैष्कर्म्यं कर्मशून्यं ज्ञानं यत्तेनोपयोनिरञ्जनमुपाधिनिवर्तकं ।

न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् । तद्ध्वाङ्क्षतीर्थं न तु हंससेवितं
यत्राच्युतस्तत्र हि साधवोऽमलाः ॥१०॥ स वाग्विसर्गो जनताघसंप्लवो यस्मिन्प्रतिश्लोकमब-
द्धवत्यपि नामान्यनन्तस्य यशोऽङ्कितानि यच्छृण्वन्ति गायन्ति गृणन्ति साधवः ॥११॥ नैष्कर्म्य-
मप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनं कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं क-
र्म यदप्यकारणं ॥१२॥ यशःश्रियामेव परिश्रमः परो वर्णाश्रमाचारतपःश्रुतादिषु अ-
विस्मृतिः श्रीधरपादपद्मयोर्गुणानुवादश्रवणादिभिर्हरेः ॥१३॥ ॥

न त्वच्युतभक्तिवर्जितं चेत्तन्न शोभते
नापरोक्षपर्यवसितं भवतीत्यर्थः ईश्वरे न चेदर्पितं तर्हि पदन्तनमेसर्वोत्तममपि पुनः कुतः शोभते
यतः साध्यसाधनकाले फलकाले च अभद्रं दुःखात्मकं ॥१२॥ किंच वर्णाश्रमाचारादिषु यः
परो महान्परिश्रमः स यशोयुक्तायाः श्रिया मेव कीर्तिः संपत्तिश्च केवलं न परमपुरुषार्थं इत्य

४५ [illegible] ५३

ततः किमित्यत आह अविस्मृतिरिति क्षिणोतिनाशयति ५५ अथेदानीं श्रोतॄनात्मानंचाभिनं ना
दन्नाह यूयमितिद्वाभ्यां हेद्विजाग्र्याः पुरेनकारणेन यस्मादात्मन्यतः कारणंश्रीनारायणमाविवे
श्य भजध्वे अतः संभावनायां लोट् अतो भूरिभागाः बहुपुण्याः कथंभूतं अखिलात्मभूतं सर्वात्मानमिति

अविस्मृतिः कृष्णपादारविंदयोः क्षिणोत्यभद्राणि शमं तनोति च सत्वस्य शुद्धिं परमात्मभक्तिं
ज्ञानंचविज्ञानविरागयुक्तं ५५ यूयंद्विजाग्र्याबतभूरिभागायच्छश्वदात्मन्यखिलात्मभूतं
नारायणंदेवमदेवमीशमजस्रभावाभजताविवेश्य ५६ अहंचसंस्मारितआत्मतत्वंश्रुतंपु
रामेपरमर्षिवक्त्रात् प्रायोपवेशेनृपतेःपरीक्षितः सदस्यृषीणांमहतांचशृण्वतां ५७ एतद्वः
कथितंविप्राः कथनीयोरुकर्मणः माहात्म्यंवासुदेवस्यसर्वाशुभविनाशनं ५८ यएवं
श्रावयेन्नित्यंयामक्षणमनन्यधीः श्रद्धावान्योनुशृणुयात्पुनात्यात्मानमेवसः ५९ द्वादश्या
मेकादश्यांवाशृण्वन्नायुष्यवान्भवेत् पठत्यनश्नन्प्रयतस्ततोभवत्यपातकी ६० पुष्करे
मथुरायांचद्वारवत्यांयतात्मवान् उपोष्यसंहितामेतांपठित्वामुच्यतेभयात् ६१ देवतामुनयः
सिद्धाः पितरोमनवोनृपाः यच्छंतिकामान्गृणतःशृण्वतोयस्यकीर्तनात् ६२

णं अतएवदेवंसर्वोपास्यं अदेवंनदेवोन्योयस्यतम् अजस्रं ध्रुवं यच्छ यस्मात्पूर्वमितिभूरिभागाः तत्रआ ॥
दिसंपन्नाः ततोनारायणंभजतेतिविधिः ५६ सेमयाश्रुतं ५७ एतत्पुराणकीर्तनादिफलप्रपंचयितुमा
ह एतदित्यष्टभिः ५८ यामंक्षणंचेत्यर्थः आत्मानमेवसः सात्पुनातिनतुस्नानादिवत्देहमात्रं ५९ ६०

भा
द्वा
५९

ऋगाद्यधीत्य द्विजो मधुकुल्यादि पदमनुविंदते तेन फलमेतावदिति नानुविंदतीति ६३ किंच प्रोक्तमिति ६४ । रा
जन्योदधिमेखलां पृथ्वीं संपद्यते ६५ अस्य पुराणस्यैवं प्रभावातिरेके कारणमाह कलिमलानां सं
हतिसमूहं कालयति विनाशयति तथा इतरत्र शास्त्रांतरे ६६ शास्त्रप्रतिपादितं भगवंतं नमस्करोति ।
तमिति द्वाभ्यां जगदुदयस्थितिसंयमात्मनो जगत्सृष्ट्यादयः शक्तयो यस्य तं द्युपतिभिर्देवैः दुरवसितः अ

ऋचो यजूंषि सामानि द्विजोधीत्यानुविंदते मधुकुल्या घृतकुल्याः पयःकुल्याश्च तत्फलं ६३
पुराणसंहितामेतामधीत्य प्रयतो द्विजः प्रोक्तं भगवता यत्तु तत्पदं परमं व्रजेत ६४ विप्रोधीत्याप्नु
यात्प्रज्ञां राजन्योदधिमेखलां वैश्यो निधिपतित्वं च शूद्रः शुध्येत पातकात कलिमलसंहति ।
कालनोखिलेशो हरिरितरत्र न गीयते ह्यभीक्ष्णं इह तु पुनर्भगवानशेषमूर्त्तिः परिपठितो
नुपदं कथाप्रसंगैः ६६ तमहमजमनंतमात्मतत्वं जगदुदयस्थितिसंयमात्मशक्तिं द्युपतिभि
रजशक्रशंकराद्यैर्दुरवसितस्तवमच्युतं नतोस्मि ६७ उपचितनवशक्तिभिः स्वआत्मन्युप
रचितस्थिरजंगमालयाय भगवत उपलब्धिमात्रधाम्ने सुरऋषभाय नमः सनातनाय ६८
स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावो प्यजितरुचिरलीलाकृष्टसारस्तदीयं व्यतनुत कृपया
यस्तत्वदीपं पुराणं तमखिलवृजिनघ्नं व्याससूनुं नतोस्मि ६९ । श्री भा पु पे द्वादशः १२

ज्ञातः स्तवः स्तोत्रं यस्य तं ६७ उपचिताभिरुदिताभिर्नवशक्तिभिः प्रकृतिपुरुषमहदहंकारतन्मा
त्ररूपाभिः स्वआत्मन्येवोपरचितस्थिरजंगमं वा लयो यस्य तस्मै भगवते ६८ श्रीशुकं नमस्करोति स
सुखेनैव निभृतं पूर्णं चेतो यस्य सः तेनैव व्युदस्तोन्यस्मिन्भावो यस्य तथा भूतोप्यजितस्य रुचिर

लीलाभिः आकृष्टः सारः स्वसुखवगानं स्थैर्यं यस्य सः तत्वदीपं परमार्थप्रकाशकं श्री
भगवतं योव्यतनुत तं नतोस्मि इति ६९ इति द्वादशः १२

सर्वपुराणसंख्यादीनपवर्गायिषु अनन्तरमितिपार्थ्यदेवप्रणमति यमिति सर्वैर्वेदैश्च स्तवंतिस्त
वंतिस्तुवंतिउपनिषच्छब्दसूक्ष्माकारोत्तरंच्छेदोनरोयन्तेध्यानेनावस्थितेनिश्चलेन तद्गतेयन्मनसा
तयश्यंतिनविदुः सुरासुरगणाः १ तीरदमणनातेरुद्रेयन्मेवद्रपोयितंकर्मावतारमनस्मारय
न्नाप्रियंकुर्वंयतेपृष्ठेध्यामयन् प्रमंदोगरिष्ठोमंदरगिरिसमग्रावाणस्तेषामग्रमाणिनेः कण्डूयया

यंत्रस्यावहृर्योङ्कुहुङ्कुमहन्तस्तवन्तीतिदिव्यैः स्तवैर्वेदैः सांगपदक्रमोपनिषद्भिर्गायंतियंसामगाः
ध्यानावस्थितंतद्गतेनमनसायश्यंतियंयोगिनो यस्यांतंनविदुः सुरासुरगणादेवायतस्मैनमः १
पृष्ठेभ्राम्यदमंदमंदरगिरिग्रावाग्रकंडूयनान्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाःपांतु
वः यत्संस्काराकलानुवर्तनवशाद्वेलानिभेनांभसांयातायातमतंद्रितंजलनिधेर्नाद्यापि
विश्राम्यति २ सू. ३ च पुराणसंख्यासंभूतिमस्यवाच्यप्रयोजने दानंदानस्यमाहात्म्यं
पाठादेश्चनिवोधत ३ ॥

ठा

नावतेनसखेनतिद्रालोः निद्राशीलस्ययेश्वासाश्वासानिलास्तेसंस्कारास्तेषांकलाश्च लेशाः तदनु
वर्तनवशात् जलनिधेरंभसांयातायातंनविश्राम्यति ततस्समुद्रोभादेवततनसंस्कारवशात् त
त्राह वेलाकोभस्तस्यनिभेनमिषेण २ पुराणसंख्यास्तासांसंभूतिसमाहारश्च अस्यश्रीभागवतस्य
वाच्यविषयंप्रयोजनंचादानंदानंच तस्यपाठादेश्चमाहात्म्यंचनिवोधत ३

भा.
टी.
मु.

त्रयोविंशतत्रयोविंशतिचतुर्विंशतिसहस्राणिशैवकंशिवपुराणं ४ वाह्नेत्रयग्निपुराणंदशपंचसह
स्राणिचत्वारिंशतानि ५ स्कांदशतानाधिकाशीतिसहस्रकं ७ सौपर्णेगारुडःपुराणंएकोनविंशदेको
नविंशति ८ महाभारतेतिनिहासःविसोपमोत्तरंचेतिहासपंचरामायणोत्रृषिप्रोक्तंकाव्यमतः ९

५२

ब्रह्मांडेदशसहस्राणिपाद्मंपंचोनषष्ठिच श्रीवैष्णवंत्रयोविंशच्चतुर्विंशतिशैवकं ४ दशाष्टौ ।
श्रीभागवतेनारदंपंचविंशतिःमार्कंडेयंनववाह्नंचदशपंचचतुःशतं ५ चतुर्दशभविष्यंस्यात
थापंचशतानिच दशाष्टौब्रह्मवैवर्तंलिंगमेकादशैवतु ६ चतुर्विंशतिवाराहमेकाशीति
सहस्रकं स्कांदशतंतथाचैकंवामनंदशकीर्तितं कौर्मंसप्तदशाख्यातंमात्स्यंतत्तुचतु
र्दश एकोनविंशत्सौपर्णंब्रह्मांडंद्वादशैवतु ८ एवंपुराणसंदोहश्चतुर्लक्षउदाहृतः त
त्राष्टादशसहस्रंश्रीभागवतमिष्यते ९ इदंभगवतापूर्वंब्रह्मणेनाभिपंकजे स्थितायभव
भीतायकारुण्यात्संप्रकाशितं १० आदिमध्यावसानेषुवैराग्याख्यानसंयुतं हरिलीलाक
थाव्रातामृतानंदितसत्सुरं ११ सर्ववेदांतसारंयद्ब्रह्मात्मैकत्वलक्षणं वस्त्वद्वितीयंतन्निष्ठं
कैवल्यैकप्रयोजनम् १२

पुराणानांसंदोहःसमुदायश्चतुर्लक्षसंख्याकएवंइदानींभागवतस्यप्रयोजनादीनदर्शयितुमाह त
त्रेत्यादिना ९ १० हरिलीलाकथाव्रातःसमूहःसएवामृतंतेनानंदिताःसंतःसुराश्चयेनतत्

हरिलीलाविवेक ॥ मुक्ता

प्रौष्ठपद्यां भाद्रपद्यां हेमसिंहसमन्वितं स्वर्णसिंहासनारूढं १३ तद्रस एवामृतं तेन तृप्तस्य निर्वृतस्य
१५ पारमहंस्यं पारमहंसैः प्राप्यं नैष्कर्म्यं सर्वकर्मोपरमः भक्त्या तत्तच्छ्रवणादिपरो विमुच्यते १८ श्रीभा
गवतं सम्प्रदायप्रवर्तकरूपेण भगवानलक्षणं मंगलाचरति कस्मै ब्रह्मणे अतुलः असमः श्रीभा

प्रौष्ठपद्यां पौर्णमास्यां हेमसिंहसमन्वितं ददाति यो भागवतं स याति परमां गतिं १३ राजन्ते ता
वदन्यानि पुराणानि सतां गणे यावद्भागवतं पुण्यं श्रूयते सत्सागरम् १४ सर्ववेदान्तसारं
हि श्रीभागवतमिष्यते तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित १५ निम्नगानां यथा गङ्गा दे-
वानामच्युतो यथा वैष्णवानां यथा शम्भुः पुराणानामिदं तथा क्षेत्राणां चैव सर्वेषां यथा
काशी ह्यनुत्तमा तथा पुराणव्रातानां श्रीमद्भागवतं द्विजाः १७ श्रीमद्भागवतं पुराणममलं
यद्वैष्णवानां प्रियं यस्मिन्पारमहंस्यमेकममलं ज्ञानं परं गीयते यत्र ज्ञानविरागभक्तिसहितं
नैष्कर्म्यमाविष्कृतं तच्छृण्वन् विपठन् विचारणपरो भक्त्या विमुच्येन्नरः १८ कस्मै येन विभा
सितोऽयमतुलो ज्ञानप्रदीपः पुरा तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा योगीन्द्राय तदा

१९

गवतं रूपः पुरा कल्पादौ तद्रूपेणो ब्रह्मरूपेण तद्रूपिणा नारदरूपिणा योगीन्द्राय शुकाय तदात्मना
नाशुकरूपेण तत्त्वं परं सत्यं श्रीनारायणाख्यं तत्त धीमहि इति गायत्र्यर्थोपक्रमसमुपसंहरन् ।
गायत्र्याख्या ब्रह्मविद्येयमिति दर्शयति १९

भा०
द्वा०
५८

नेमवदेतान्रूपेणानुरूपेणाप्रणमति नमास्तिद्वाभ्यां व्याचष्टे व्याख्यानवान् १९ २१ २२ २३ भावा
र्थदीपिकामेनामभगवद्भक्तवत्सलो श्रीपरानंदपादाब्जभृंगः श्रीश्रीधरोकेरान् १ स्ववालचापला

नमस्तस्मै भगवते वासुदेवाय साक्षिणे य इदं कृपया कस्मै व्याच
चक्षे मुमुक्षवे १९ योगींद्राय नमस्तस्मै शुकाय ब्रह्मरूपिणे संसा
रसर्पदष्टं यो विष्णुरातममूमुचत् २१ भवे भवे यथा भक्तिः पादयो
स्तव जायते तथा कुरुष्व देवेश नाथस्त्वं मे यथा प्रभो २२ नामसंकी
र्तनं यस्य सर्वपापप्रनाशनम् प्रणामो दुःखशमनस्तं नमामि
हरिं परम् २३ इति श्रीभागवते द्वादशस्कंधे त्रयोदशोध्यायः १३

लापैः स्वलीलापरिवर्तितैः प्रीयतां परमानंदनृहरिः एष हरिः स्वयं २ श्रीपरानंदसंप्रीत्यै श्रीभा
गवतमया विवृतं तन्मतेनेदं तन्नमस्मातिवैभवात् १ इति श्रीभावार्थदीपिकायां द्वादशस्कंधे
त्रयोदशोध्यायः १३ समाप्तं ॥ ॥ ५८

Acc. 743
द्वादश स्कंध

दे ... तनदंनत्रम